CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Almira 3
Shelf 4
30

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथसपिण्डीकरणविधिः ॥

Nepal Sanskrit University, Balmeeki Campus, K...

श्रीः

अथ सपिण्डीकरणविधिः ॥ त्रैवर्णिकजातस्य शूद्रस्य च शंखलिखितो नीय
नेतु सपिण्डत्वं येषां शूद्रः कुलोद्भवः सर्वे शूद्रत्वमायान्ति यदि स्वर्गजितो
पि ते ॥ सपिण्डीकरणे ज्येष्ठपुत्रस्यैवाऽधिकारः ॥ तथा च वायुपुराणे ॥ श्रा
द्धानि षोडशादत्वा नतु कुर्यात्सपिण्डनम् ॥ प्रोषितो वसितेपुत्रः कालादपि चि
रादपि ॥ यदि षोडशश्राद्धानि कनिष्ठभ्रात्रादिना कृतानि तदा ज्येष्ठः सपिण्डनमे
व कुर्यादित्यपरार्के ॥ इदं च सति ज्येष्ठे ॥ तदभावे कनिष्ठेन तदभावे भ्रात्राद्य
धिकारिभिः ॥ पुरुषस्य सपिण्डनं कार्यम् ॥ भ्राता वा भ्रातृपुत्रो वा सपिण्डः शि
ष्य एव वा ॥ सपिण्डीकरणं कुर्यात् पुत्रहीने मृते सति ॥ इति मनुवचनात् ॥
तथा ज्येष्ठेन वा कनिष्ठेन सपिण्डीकरणे कृते ॥ देशान्तरगतानां च पुत्राणां चकृ
तं भवेत् ॥ श्रुत्वा तु वपनं कार्यं दशाहान्तर्निलोदकम् ॥ ततः सपिण्डीकरणं कु
र्यादेकादशेऽहनि ॥ द्वादशाहेन कर्तव्यमिति शातातपोऽब्रवीत् ॥ स्वस्यार्थंसा
रेतु ॥ ब्रह्मचारिणामनपत्यानां च सपिण्डनं नास्ति ॥ तेषां स एकोदिष्टमेव
व्युत्क्रममृतानां व्यवहितैः सापिण्ड्यं कार्यं वा ॥ केचित्सर्वत्र सपिण्डनमाहुः ।
यतीनां प्रेतत्वं नास्ति अतस्तेषां नैकोद्दिष्टं न सपिण्डीकरणम् ॥ किन्तु एकादशे
ह्नि तृतीये ह्नि वा ॥ अहाशौचे पंचमे ह्नि सपिण्डनं कार्यम् ॥ तच्च सपिण्डनमनेक
कालत्वेऽपि कलौ द्वादशाहे कार्यम् ॥ आनन्त्यात्कुलधर्माणां पुंसां चैवाऽऽयुषः क्ष
यात् ॥ अनित्यत्वाच्छरीरस्य द्वादशाहः प्रशस्यते ॥ इति वचनात् ॥ गोभिलः द्वाद
शाहादिकालेषु प्रमादादननुष्ठितम् ॥ सपिण्डीकरणं कुर्यात्कालमुत्तरभा
विषु ॥ उत्तरभाविषु त्रिपक्षादिषु तेच काला भविष्यत्पुराणे उक्ताः सपिण्डी
करणं कुर्याद्यजमानस्त्वनग्निमान् ॥ अनाहिताग्नेः प्रेतस्य पूर्णे द्वे भरतर्षभ ॥

द्वादशेऽहनि षष्ठे वा त्रिपक्षे वा त्रिमासि वा ॥ एकादशेऽपि वा मासि मंगलं स्या
दुपस्थितम् षष्ठे मासीत्यन्वयः ॥ यदा मंगलं वृद्ध्याद्युपस्थितं स्यात् ॥ ततः
पूर्वमपि काल इत्यर्थः ॥ अथ प्रयोगः ॥ सपिण्डीकरणं बहुधा अपात्रकमे
वाचरन्तीति अपात्रकः प्रयोग एव लिख्यते ॥ तत्र मध्याह्ने कर्ता स्नातः शुचिरा
चान्तः पूर्वोपकल्पितं स्थापितगोरसर्षपादिरक्षोघ्नं भूप्रदेशं गत्वा पूर्वा
भिमुख उपविश्य रक्षोघ्नदीपं प्रज्वाल्य सव्येन ॥ ॐ यं देवा देवहेऽनमिनिक
रिऽकात्रयेण कर्मपात्रं कृत्वा ॥ कुशत्रयसहितं कर्मपात्रोदकमादाय ॥ ॐ
अपवित्रः पवित्रो वेत्यादि पठित्वा ॥ ॐ पुण्डरीकाक्षः पुनातु ॥ इत्युक्त्वा आ
त्मदेशे द्रव्याण्यात्मानं च सिंचेत् ॥ ततः कुशादिकमादाय ॥ ॐ अद्याऽमुकगो
त्रस्याऽमुकप्रेतस्य प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थममुकगोत्रैरस्मत्पि
तामहप्रपितामहवृद्धप्रपितामहैरमुकाऽमुकाऽमुकशर्मभिर्वसुरुद्रादित्य
स्वरूपैः सह कालकामविश्वेदेवपूर्वकं सपिण्डीकरणं मृताहाद्द्वादशाहे पार्व
णैकोद्दिष्टविधिनाऽहं करिष्ये ॥ इति प्रतिज्ञां कुर्यात् ॥ मातुः सपिण्डीकरणेतु
॥ ॐ अद्याऽमुकगोत्राया मातुरमुकप्रेतायाः प्रेतत्वनिवृत्तिपितृलोकप्राप्त्य
र्थं अमुकगोत्राभिरस्मत्पितामहीप्रपितामहीवृद्धप्रपितामहीभिरमुकाऽमुकाऽ
मुकाऽमुकदेवीभिर्वसुरुद्रादित्यस्वरूपाभिः सहेत्यादि पूर्ववत् ॥ भ्रात्रादीनां स
पिण्डीकरणे ॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वनिवृत्तिपितृलोकप्राप्त्य
र्थं अमुकगोत्रैः स्वपितृपितामहप्रपितामहैरमुकाऽमुकाऽमुकशर्मभिर्वसुरुद्रा
दित्यस्वरूपैः सहेत्यादि पूर्ववत् ॥ सहगमने तु ॥ ॐ अद्याऽमुकगोत्राया मातुर
मुकप्रेतायाः प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थं अमुकगोत्रेण स्वभर्त्रा सह सपि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्डीकरणं मृतानां द्वादशाहेऽहं करिष्ये॥ इति विशेषः॥ ततो देवतान्यः इति त्रिपठेत्
॥ ततो देव श्राद्धार्थोपकल्पितासनादि देशमागत्य॥ सव्येनैव उदङ्मुख उपवि
श्य॥ कुशादीन्यादाय॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनि
मित्तकानाममुकगोत्राणां मत्पितृपितामहप्रपितामहवृद्धप्रपितामहानां वसुरु
द्रादित्यस्वरूपाणां श्राद्धसंबंधिनां कालकाम विश्वेषां देवानामिदमासनं वो न
मः॥ इति पूर्वाग्रकुशद्वयमासनं यवजलप्रोक्षितं उत्सृजेत्॥ ततः विश्वान्देवा
नावाहयिष्ये॥ इत्युक्त्वा॥ ॐ विश्वेदेवास आगत इति मंत्रेणावाह्य॥ ॐ यवो
सि यवयास्मद्द्वेषो यवयारातीः इति मंत्रेण श्राद्धदेशे यवान् विकीर्य॥ ॐ विश्वेदे
वाः शृणुतेइमा दिवाहिर्षि मादयध्वमित्यन्तं पठित्वा॥ आगच्छन्तु महाभागा वि
श्वेदेवा महाबलाः॥ ये यत्र विहिताः श्राद्धे सावधाना भवन्तु मे॥ इति पठेत्॥ ततः स्व
मंत्रेण पवित्रं पुटकापूर्वाग्रे धृत्वा॥ जलयवगन्धपुष्पाणि स्वस्वमंत्रैः क्षिपेत्॥
ततोऽर्घ्यपात्रं वामहस्तेनाच्छाद्य॥ ॐ या दिव्या आपः पयसा इत्यादिनाऽर्घ्यपा
त्रस्थजलमभिमंत्र्य॥ कुशयवजलान्यादाय॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रे
तस्य सपिण्डीकरणनिमित्तकाः अमुकगोत्राणां पितामहप्रपितामहवृद्धप्रपि
तामहानां ममुकाऽमुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणां श्राद्धसंबन्धि
नः कालकामः विश्वेदेवाः एष हस्तार्घो वो नमः॥ इति पवित्रोपरि अर्घ्यजलं ददउ
त्सृजेत्॥ ततः पवित्रसहितमर्घ्यपात्रमासनस्य दक्षिणपार्श्वे कालकाम विश्वेभ्यो
देवेभ्यः स्थानमसीति देवार्घपात्रमुत्तानं स्थापयेत्॥ ततो गंधादिभिः संपूज्य
॥ कुशादीन्यादाय॥ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्त
का अमुकगोत्राणां पितामहप्रपितामहवृद्धप्रपितामहानां ममुकाऽमुकाऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुकशर्मणां वसुरुद्रादित्यस्वरूपाणां श्राद्धसंबन्धिनः कालकामविश्वेदेवाः एतानि
गन्धपुष्पाक्षतधूपदीपवासांसि वो नमः॥ इति गंधादिकमुत्सृजेत्॥ ततोऽपसव्ये
न तिलघृतमधुजलयुतमन्नं मोदकादिसहितमादाय॥ ॐ इदमन्नं सजलमेतद्द
स्यामि पितृभ्यो नमः इति उत्सृजेत्॥ ततः सव्यं कृत्वा॥ आसनसहितस्यान्नपात्रस्य
चतुर्दिक्षु चतुष्कोणमण्डलं विधाय देवान् ध्यायन्॥ सोपस्करयवजलयुतमन्न
मुपनीय॥ अन्नं मधुना मिश्रार्थे कुशहस्ताभ्यामन्नपात्रमालभ्य॥ ॐ पृथिवी
ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा॥ ॐ इदं विष्णु
र्विचक्रमे त्रेधा निदधे पदम्॥ समूढमस्य पांसुरे॥ इति पठित्वा॥ ॐ इदमन्न
मित्यन्ने॥ ॐ इमा आप इति जले॥ ॐ इदमाज्यमिति घृते॥ ॐ इदं हविरिति उत्तर
त्रे॥ दक्षिणकराङ्गुष्ठं निवेश्य॥ ॐ यवोसि यवयास्मद्द्वेषो यवयारातीरिति मन्त्रे
ण यवानन्नोपरि प्रक्षिप्य॥ कुशयवजलान्यादाय॥ ॐ अद्याऽमुकगोत्रस्याऽमु
कप्रेतस्य सपिण्डीकरणनिमित्तकेभ्यः अमुकगोत्राणां पितामहप्रपितामह
वृद्धप्रपितामहानाममुकाऽमुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणां श्राद्ध
सम्बन्धिभ्यः कालकामविश्वेभ्यो देवेभ्य एतदोऽन्नं सोपस्करं नमः॥ इत्युत्सृजेत्
एवं देवकाण्डं निर्वर्त्य॥ हस्तौ पादौ प्रक्षाल्य॥ आचम्य प्रेतश्राद्धदेशमागत्य
पवित्रकृताऽपसव्यो दक्षिणामुखः॥ कुशाद्यन्यादाय॥ अद्याऽमुकगोत्रस्या
मुकप्रेतस्य सपिण्डीकरणश्राद्धे इदमासनन्ते मया दीयते तवोपतिष्ठतामिति
कुशरूपमासनमुत्सृज्य॥ पृथिवीदेशमागम्य॥ ततो मोदकादिकमादाय॥ ॐ अ
द्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तक श्राद्धे अमुकगोत्रस्य पिता
महस्याऽमुकशर्मणो वसुस्वरूपस्येदमासनन्ते स्वधा॥ इति स्थानत्रये शुक्लमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सनेषु सर्वपश्चिमस्थानस्थिते आसने मोदकरूपमासनमुत्सृजेत्॥ पुनर्मो
दकादिकमादाय॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमि
त्तकश्राद्धे अमुकगोत्रस्य प्रपितामहस्यामुकशर्मणो रुद्रस्वरूपस्येदमासन
न्ते स्वधा॥ इति दत्वासनान्पूर्वं प्रपितामहाय मोदकरूपमासनमुत्सृज्य॥ पुन
र्मोदकादिकमादाय॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनि
मित्तकश्राद्धे अमुकगोत्रस्य वृद्धप्रपितामहस्यामुकशर्मण आदित्यस्वरू
पस्येदमासनन्ते स्वधा॥ इति सर्वपूर्वं वृद्धप्रपितामहाय मोदकरूपमासनमु
त्सृजेत्॥ ततः प्रेतवर्ज्यं पितामहादिनु द्विजपितृनावाहयिष्ये॥ इत्युक्त्वा॥ ॐ
उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशत आवह पितॄन्हविषे अ
त्तवे॥ इति पितामहादीनावाह्य॥ ॐ अपहता असुरा रक्षांसि वेदिषदः
इति श्राद्धदेशे तिलान्विकीर्य॥ ॐ आयन्तु नः पितरः सोम्यासोग्निष्वात्ताः प
थिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्॥ इति मं
त्रं जपेत्॥ ततो प्रेताय अर्घार्थं पूर्वभागे एकं पुटकमासाद्य॥ तत्पश्चिमभागे पितॄ
णां दक्षिणसंस्थं पुटकत्रयमासाद्य तेषु चतुर्ष्वपि॥ ॐ पवित्रेस्थ इति मन्त्रेण प्र
त्येकं दक्षिणाग्राणि पवित्राणि कृत्वा॥ जलतिलगन्धपुष्पाणि स्वस्वमन्त्रैः प्रत्ये
कं तेषु क्षिपेत्॥ ततः प्रेतार्घपात्रं वामहस्ते कृत्वा॥ नमो नारायणायेति मन्त्रेणान्न
पात्रोपरि पवित्रमुत्तराग्रं धृत्वा॥ या दिव्या आप इति आदि मन्त्रेणार्घपात्रस्थ
जलं दक्षिणहस्तेनाच्छादितमभिमन्त्र्य॥ कुशादिकमादाय॥ अद्यामुकगोत्रा
ऽमुकप्रेतसपिण्डीकरणश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवि
त्रोपरि चतुर्थभागजलं ददत्सृजेत्॥ ततः ॐ अद्यामुकगोत्रस्यामुकप्रेतस्या

ऽपुनरपिमंत्रद्वयंपठित्वा प्रेतार्घपात्राऽवशिष्टतृतीयभागजलंपुटकान्तरे धृत्वा ॥ १४=

ऽर्घपात्रोदकं अमुकगोत्राणां पितामहप्रपितामहवृद्धप्रपितामहानाममुका
ऽमुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणामर्घपात्रोदकेनसंयोजयिष्ये
इत्युक्त्वा पितामहादिपात्रत्रये प्रेतार्घपात्रजलस्य भागत्रयं कृत्वा ॥ एकै
कंभागं वक्ष्यमाणमंत्रैः संयोजयेत् ॥ प्रेतार्घपात्रजलविभागेपि ॥ येसमानाइ
तिमन्त्रद्वयपाठः ॥ निरुप्य चतुरः पिण्डान् आद्यदः पितृनामतः ॥ येसमानामि
ति द्वाभ्यां मायत्र विभजेत्त्रिधा ॥ एव स्तद्विधिः प्रोक्तः अर्घपात्रचतुष्टये ॥ इति
वचनात् ॥ मिताक्षरायाम् ॥ हस्तन्यस्तोदकंप्रेतार्घपात्रजलमादौ पितामह
घर्घ्यपात्रे संयोज्याऽवशिष्टजलेन प्रेतार्घं दद्यात् ॥ इत्युक्तम् ॥ तत्र क्रमः ॥
सव्यं कृत्वाचम्य ॥ अपसव्यं कृत्वा अन्यत्पुटकत्रयमग्रे धृत्वा प्रेतार्घपात्रं गृही
त्वा ॥ येसमानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु क
ल्पताम् ॥ येसमानाः समनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पताम
स्मिंल्लोके शतं समाः ॥ इति मन्त्रौ पठित्वा प्रेतार्घपात्रस्थजलतृतीयभागंपु
टकान्तरे धृत्वा ॥ पुनरपि मन्त्रद्वयं पठित्वा ॥ अपरतृतीयभागं पुटकान्तरे धृ
त्वा ॥ प्रथमपुटकस्थविभक्तजलतृतीयभागं प्रेतार्घपात्रे कृत्वा ॥ सपवित्र
पुष्पसहितं प्रेतार्घपात्रं वामहस्तेनादाय ॥ पितामहार्घपात्रं दक्षिणहस्तेनादाय
५= येसमानाः समनसो जीवा जीवेषु मामकाः ॥ तेषां श्रीर्मयि कल्पतामस्मिंल्लो
के शतं समाः संसृजतु त्वा पृथिवी वायुरग्निः प्रजापतिः संसृजध्वं च पूर्वेभि
स्तिस्तृभिः पितृभिः सहसंगच्छस्व संवद्ध्वं सं वो मनांसि जानताम् ॥ देवा भागं य
था पूर्वे संजानाना उपासते ॥ समानो मंत्रः समितिः समानी समानं मनः सहचि
त्तमेषाम् ॥ समानं मंत्रमभिमंत्रयेव ॥ समानेन वो हविषा जुहोमि ॥ समानी व आ

ॐ येसमानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ५=

आकूतिः समाना हृदयानि वः समानमस्तु वो मनो यथा वः सुसहासति ॥ मधु
वातेति ऋचमपि पठेदिति केचित् ॥ इति मंत्रान् पठित्वा प्रेतार्घपात्रस्थतृ
तीयभागं जलं पितामहार्घपात्रजले मेलयेत् ॥ एवमपरमुदकद्वयस्थितार्घ
पात्रजलतृतीयभागद्वयं क्रमेण प्रत्येकं मन्त्रान् पठित्वा प्रपितामहार्घपात्रज
ले ॥ वृद्धप्रपितामहार्घपात्रजले च क्रमेण मेलयेत् ॥ ततः अमुकगोत्र अमुकप्रे
तः अमुकगोत्रैः स्वपितृपितामहप्रपितामहैः अमुकामुकामुकशर्मभिर्वसु
रुद्रादित्यस्वरूपैः सहमाऽयं गच्छेत्युक्त्वा पितामहार्घपात्रं वामहस्ते कृत्वा
ॐ नमो नारायणायेति मंत्रेण पवित्रमन्त्रपात्रोपरि धृत्वा ॥ ॐ या दिव्या आप
इत्यादिनार्घपात्रस्थजलमभिमंत्र्य ॥ मोटकादिकमादाय ॥ अद्यामुकगो
त्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र पितामहामुक
शर्मन् वसुस्वरूप एषतेऽर्घः स्वधा ॥ इति पवित्रोपरि अर्घजलं दद्युत्सृजेत् ॥
पवित्रकुशसहितमर्घपात्रमग्रे धारयेत् ॥ ततः प्रपितामहार्घपात्रं वामहस्ते
कृत्वा ॥ ॐ नमो नारायणायेति मंत्रेण कुशसहितं पवित्रमन्त्रपात्रोपरि धृत्वा
॥ ॐ या दिव्या आप इत्यादिनार्घपात्रस्थजलमभिमन्त्र्य ॥ मोटकादिकमा
दाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अ
मुकगोत्र प्रपितामह अमुकशर्मन् रुद्रस्वरूप एषतेऽर्घः स्वधा इति पूर्ववद्
दुत्सृजेत् ॥ पवित्रकुशसहितमग्रे स्थापयेत् ॥ तृतीयार्घपात्रं वामहस्ते कृत्वा
ॐ नमो नारायणायेति मंत्रेण कुशसहितं पवित्रमन्त्रपात्रोपरि धृत्वा ॥ ॐ या
दिव्या आप इत्यादिनाऽर्घपात्रस्थजलमभिमंत्र्य ॥ मोटकादिकमादाय ॥
ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुक

प्रेतस्य सपिण्डीकरणनिमित्तश्राद्धे अमुकगोत्र हू प्रपितामह अमुकशर्म
न् आदित्यस्वरूप एष ते अर्घः स्वधा ॥ इति पूर्ववदर्घं समुत्सृजेत् ॥ पवित्रउ
भयसहितं प्रेतार्घपात्रमग्रे स्थापयेत् ॥ तदुपरि कुशान्दद्यात् ॥ हू प्रपिता
महार्घपात्रस्थजलादिकं प्रपितामहार्घपात्रे कृत्वा ॥ तत्सर्वं पितामहार्घ
पात्रे कृत्वा पितामहार्घपात्रे कृत्वा पितामहार्घपात्रमुत्तानं प्रपितामहार्घ
पात्रोपरि धृत्वा ॥ तद्द्वयमुत्तानं हू प्रपितामहार्घपात्रोपरि धृत्वा पात्रत्रयं
एकदैव पितामहासनवामपार्श्वे पितामहादिभ्यः स्थानमसीति न्युब्जं कृत्वा
स्थापयित्वा तदुपरि कुशत्रयं दद्यात् ॥ स्वस्था पितमर्घपात्रचतुष्टयं दक्षि
णादान पर्यन्तं न चालयेत् ॥ ततः क्रमेण प्रेतमारभ्य गन्धादिभिः सर्वान् संपू
ज्य ॥ ततः कुशाद्यमादाय ॥ अद्याऽमुकगोत्र अमुकप्रेत सपिण्डीकरणश्रा
द्धे एतानि गन्धपुष्पाक्षतधूपदीपवासांसि ते मया दीयन्ते तवोपतिष्ठन्तामि
ति प्रेताय गन्धादिकमुत्सृजेत् ॥ पुनर्मोटकादिकमादाय ॥ ॐ अद्याऽमुक
गोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राः पिताम
ह हू प्रपितामहा अमुका अमुका अमुकशर्माणो वसुरुद्रादित्यस्वरूपा एता
नि गन्धपुष्पाक्षतधूपदीपवासांसि युष्मभ्यं स्वधा ॥ इति पितामहादिभ्यो गन्धा
दिकमुत्सृजेत् ॥ ततः प्रेतासनस्य चतुर्दिशं चतुःकोणमण्डलं विधाय ॥ अपरं पि
तामहादित्रिके मण्डलं कुर्यात् ॥ ततः सव्यं कृत्वा प्राङ्मुख उपवीती पातितदक्षि
णजानुः ॥ पुटकाद्दोमघृतमन्नं कृत्वा पुटकादिजले ॥ ॐ अग्नये कव्यवाहनाय
स्वाहा ॥ इदमग्नये कव्यवाहनाय ॥ ॐ सोमाय पितृमते स्वाहा ॥ इदं सोमाय पितृम
ते ॥ इत्याहुतिद्वयं तदभावे ग्रंजुहुयात् ॥ अपसव्यं कृत्वा ॥ अवशिष्टमन्नं पिताम

हादिपात्रे किञ्चिद्दद्यात् ॥ ततः क्रमेणान्नेपकं सोपस्करणमन्नमुपनीय ॥ पृ
थक्पृथक्पृथक्स्थितसतिलजलं चोपनीय ॥ प्रेतपात्रादिस्थितान्नेषु म
धु दद्यात् ॥ ततः पात्रालंभनाङ्गुष्ठावगाहनं विना ॥ पृथिवीते पात्रं द्यौरपिधा
नं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधा नि
दधे पदम् ॥ समूढमस्य पांसुरे ॥ इति पठित्वा अपहता असुरा रक्षांसि
वेदिषदः ॥ इति अन्नोपरि प्रचुरतिलान् प्रक्षिप्य ॥ कुशादीन्यादाय ॥ अद्या
मुकगोत्राया ऽमुकप्रेतायाः सपिण्डीकरणनिमित्ताधीयतेनचोपतिष्ठतामिति
प्रेतायान्नमुत्सृजेत् ॥ ततः पितामहाऽन्नपात्रं सव्यहस्ताभ्यां न्युब्जाभ्यां हस्ताभ्यां
मालभ्य ॥ ॐ पृथिवीते इत्यादि जुहोमि स्वाहान्तं इदं विष्णु रित्यादि सुरे
त्यन्तं च पठित्वा ॥ ॐ इदमन्नम् ॥ ॐ इमा आपः ॐ इदमाज्यम् ॥ ॐ इदं हवि
रिति प्रत्यन्ते एतान्युपकरणानि क्रमेणाऽन्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं
निवेश्य ॥ ॐ अपहता असुरा रक्षांसि वेदिषदः ॥ इति अन्नोपरि तिलान्
प्रक्षिप्य मोटकादीन्यादाय ॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपि
ण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय पितामहायाऽमुकशर्मणे व
सुस्वरूपाय एतत्तेऽन्नं सोपकरणं स्वधा ॥ इति पितामहायान्नमुत्सृजेत् ॥ ततः
प्रपितामहान्नपात्रमालभ्य पूर्ववत् पृथिवीते इत्यादिकं कृत्वा ॥ मोटकादीन्या
दाय ॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अ
मुकगोत्राय प्रपितामहायाऽमुकशर्मणे रुद्रस्वरूपाय एतत्तेऽन्नं सोपकरणं
स्वधा ॥ इति प्रपितामहायाऽन्नमुत्सृजेत् ॥ ततो वृद्धप्रपितामहाऽन्नपात्रमालभ्य
पूर्ववत् पृथिवीते ॥ इत्यादिकं सर्वं कृत्वा ॥ मोटकादीन्यादाय ॥ ॐ अद्याऽमुक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तक श्राद्धे अमुकगोत्राय वृद्धप्रपिता
महायाऽमुकशर्मणे आदित्यस्वरूपाय एतत्तेऽन्नं स्वधा ॥ इति वृद्धप्रपितामहाऽ
न्नमुत्सृजेत् ॥ ततः सव्येन मधुवातेतिऋचम् ॥ ॐ मधु ॐ मधु ॐ मधु इति च
जपित्वा अन्नहीनमित्यादि पठित्वा ॥ नमस्तुभ्यं विरूपाक्षेति च पठेत् ॥ ततः
पितामहाऽन्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयोपरि भूमौ विकरसन्नं
दद्यात् ॥ अपसव्येनैव मोदकमादाय ॥ असंस्कृतप्रमीतानां त्यागिनां कुलयो
षिताम् ॥ उच्छिष्टभागधेयानां दर्भेषु विकरासनम् ॥ इति मन्त्रेण मोदकरूपमा
सनमास्तृतकुशोपरि उत्सृजेत् ॥ ततः सतिलयवमम्भमादाय ॥ जलेनाऽन्ना
व्यं मोदकं चादाय ॥ अग्निदग्धाश्च ये जीवा ये प्यदग्धाः कुले मम ॥ भूमौ दत्ते
न तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ इति आस्तृतकुशोपरि तदन्नं विकिरेत् ॥ ततः
सव्यं कृत्वा ॥ आचम्य हरिं स्मरेत् ॥ अपसव्यं कृत्वा ॥ ततः प्रेतपिण्डदानार्थमे
कां पितामहादिकपिण्डदानार्थमपरं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतीं द
क्षिणप्लवां पिण्डिकां निर्माय प्रेतपिण्डिकायां रेखाकरणोल्मुकभ्रामणं वि
नैव छिन्नमूलकुशानानीय ॥ अपरपिण्डिकामध्ये वामेन पाणिना दर्भपि
ञ्जुलीं गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूलेन सव्योपगृहीतदक्षिणपाणि
ना ॥ अपहता असुरा रक्षांसि वेदिषद ॥ इति मन्त्रेण दक्षिणाग्रां रेखां प्रा
देशप्रमाणां सकृदुल्लिख्य दर्भपिञ्जुलीमुत्तरस्यां क्षिपेत् ॥ ततो रेखां परि
ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ॥ परापुरो निपु
रो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मात् ॥ इति मन्त्रेणाऽङ्गारं भ्रामयित्वा दक्षिण
स्यां क्षिपेत् ॥ ततो रेखायां छिन्नमूलकुशास्तृणुयात् ॥ ततः सव्येनाचम्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपसव्यं कृत्वा ॥ पृथक् द्वये गन्धपुष्पतिलजलानि कृत्वा ॥ एकं पृथक् वा
महल्ले कृत्वा कुशादिकमादाय ॥ अद्याऽमुकगोत्राऽमुकप्रेतस पिण्डीक
रण श्राद्ध पिण्डस्थाने इदमवनेजनं मया दीयते नवोपतिष्ठतामिति पू
र्वे पिण्डिकायां छिन्नमूलकुशोपरि अवनेजनं दद्यात् ॥ ततोऽपरं पृथक्
वा महल्ले कृत्वा ॥ मोटकादिमादाय ॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेत
स्य सपिण्डीकरण निमित्तक श्राद्ध पिण्डस्थाने अमुकगोत्र पितामह अ
मुकशर्म्मन् वसुस्वरूपाऽत्रावने निक्ष्व ते स्वधा ॥ इति द्वितीय पिण्डिकाया
मास्तृतकुश मूल सन्निधाने पितामहायाऽवनेजनं दद्यात् ॥ पुनर्मोटकादि
मादाय ॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरण निमित्तक
श्राद्ध पिण्डस्थाने अमुकगोत्र प्रपितामह अमुकशर्मन् रुद्रस्वरूप अत्राव
नेनिक्ष्व ते स्वधा ॥ इति आस्तृतकुश मध्ये प्रपितामहायाऽवनेजनं दद्यात् ॥
पुनर्मोटकादिकमादाय ॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीक
रण निमित्तक श्राद्ध पिण्डस्थाने अमुकगोत्र वृद्धप्रपितामह अमुकशर्म
न् आदित्यस्वरूप अत्रावने निक्ष्व ते स्वधा ॥ इति आस्तृतकुशाग्रे वृद्धप्रपि
तामहायाऽवनेजनं दद्यात् ॥ ततः कपित्थप्रमाणांश्चतुरः पिण्डान्निर्माय ॥
प्रथम पिण्डं कुशतिलसहितमादाय ॥ अद्याऽमुकगोत्राऽमुकप्रेतस पिण्डी
करण श्राद्धे एष पिण्डस्ते मया दीयते नवोपतिष्ठतामिति पूर्वे पिण्डिकायां कु
शोपरि प्रेतपिण्डं दद्यात् ॥ ततो मोटकादीनि पिण्डं चादाय ॥ ॐ अद्याऽमुक
गोत्रस्याऽमुकप्रेतस्य सपिण्डीकरण निमित्तक श्राद्धे अमुकगोत्र पितामहा
ऽमुकशर्मन् वसुस्वरूप एष ते पिण्डः स्वधा ॥ इति पश्चिम पिण्डिकायां प्रथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माऽवनेजनस्थाने पितामहाय पिण्डं दद्यात्॥ उन्मोटकादीनि पिण्डं चादाय॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र पितामहाऽमुकशर्मन् वसुस्वरूप एष ते पिण्डः स्वधा॥ इति द्वितीयाऽवनेजनस्थाने प्र पितामहाय पिण्डं दद्यात्॥ उन्मोटकादीनि पिण्डं चादाय॥ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र रुद्र प्रपितामहाऽमुकशर्मन् आदित्य स्वरूपैष ते पिण्डः स्वधेति तृतीयाऽवनेजनस्थाने रुद्र प्रपितामहाय पिण्डं दद्यात्॥ ततः पितामहादि पिण्डोपरि कुशमूलेन लेपभागभुजस्तृप्यन्तु॥ इति करं प्रोक्ष्य॥ सव्यं कृत्वाऽऽचम्य॥ हरिं स्मरेत्॥ ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो मंत्रपाठं विना प्रेतं भास्वरमूर्तिं चिन्तयेत्॥ ततः सव्येनप्प्यादीन्यादाय॥ पितामहादीन् द्विजप ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वं मित्युत्तराभिमुखो भूत्वा पठेत्॥ श्वासं नियम्य भास्वरमूर्तिं पितामहादिकं ध्यायन्॥ अपसव्यं कृत्वा॥ दक्षिणावर्तेन दक्षिणाऽभिमुखो भूत्वा॥ ॐ अमीमदन्त पितरो यथाभागमावृषायिषत॥ इति मंत्रेण उप्प्यादिकं पिण्डेषु निःक्षिपेत्॥ ततः प्रेतावनेजनपात्रं वामहस्ते कृत्वा॥ कुशादीन्यादाय॥ अद्याऽमुकगोत्रा ऽमुकप्रेतसपिण्डीकरणश्राद्ध पिण्डे इदं प्रत्यवनेजनं ते मयादीयते तवोपतिष्ठतामिति प्रेताय प्रत्यवनेजनं दत्वा॥ ततः पितामहाद्यवनेजनपात्रं वामहस्ते कृत्वा॥ मोटकादीन्यादाय॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्र पितामहाऽमुकशर्मन् वसुस्वरूप इदं प्रत्यवनेजनं ते स्वधेति पितामहाय प्रत्यवनेजनं दत्वा॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सरसायनमोवः पितरः शोषायनमोवः पितरो जीवायनमोवः पितरः स्वधायैनमोवः पितरो

अमुकगोत्रप्रपितामहाऽमुकशर्मन् रुद्रस्वरूप इदं प्रत्यवनेजनं ते स्वधे
ति प्रपितामहाय प्रत्यवनेजनं दत्वा॥ ॐ अद्यामुकगोत्रस्याऽमुकप्रेतस्य
सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्र वृद्धप्रपितामहाऽमुकश
र्मन्नादित्यस्वरूप इदं प्रत्यवनेजनं ते स्वधेति वृद्धप्रपितामहाय प्रत्यवनेजनं
दत्वा॥ ततो निवीतिभूत्वा॥ सव्यं कृत्वा नम्य अपसव्यं कृत्वा वामेन पा
णिना धृतं सूत्रं दक्षिणेनादाय मंत्रपाठं विना॥ एतेन ते वासः इत्युभा
भ्यां पिण्डोपरि सूत्रं धारयेत्॥ पूर्ववत्पुनः सूत्रमादाय ॐ नमोवः पित
रो घोराय नमोवः पितरो मन्यवे नमोवः पितरः पितरो नमोवो गृहान्नः पि
तरो देष्मैतद्वः पितरो वासः॥ इति मंत्रं पठित्वा प्रत्येकं पिण्डोपरि सूत्रं धार
येत्॥ ततः प्रत्येकं क्रमेण गन्धादिभिः पिण्डान्सम्पूज्य॥ कुशादीन्यादाय॥
अद्याऽमुकगोत्राऽमुकप्रेत सपिण्डीकरणश्राद्धपिण्डे एतानि सूत्रगंधपुष्पा
क्षतधूपदीपेक्षवादि नैवेद्यानि ते मया दीयन्ते न वोपतिष्ठतामिति प्रेतायग
न्धादिकमुत्सृजेत्॥ मोटकादिकमादाय॥ ॐ अद्याऽमुकगोत्रस्याऽमुकप्रे
तस्य सपिण्डीकरणनिमित्तक श्राद्धपिण्डे अमुकगोत्राः पितामह प्रपिताम
ह वृद्धप्रपितामहा अमुकाऽमुकाऽमुकशर्माणो वसुरुद्रादित्यस्वरूपा एता
नि सूत्रगन्धपुष्पाक्षतधूपदीपेक्षवादि नैवेद्यानि युष्मभ्यं स्वधेति पितामहा
दिभ्यो गन्धादिकमुत्सृजेत्॥ ततः पिण्डसमीपे तत्पिण्डशेषान्नं विकिरेत्॥
ततः सव्येन॥ ॐ शिवा आपः सन्तु इति जलम्॥ ॐ सौमनस्यमस्तु इति पुष्पम्
॥ ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान्॥ विश्वेदेवाद्यपात्रोपरि क्षिपेत्॥ ततो
ऽपसव्यं कृत्वा॥ शिवा आपः सन्तु इति जलम्॥ सौमनस्यमस्तु इति पुष्पम्॥॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अक्षतं चारिष्टमस्तु इति गण्डूलान् ॥ प्रेतान्नपात्रोपरि क्षिपेत् ॥ कुशादिकमा
दाय ॥ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य सपिण्डीकरणश्राद्धे दत्तैतदन्नपाना
दिकमुपतिष्ठताम् ॥ इत्यक्षय्योदकं दत्वा सव्यं कृत्वा अघोराः प्रेताः सन्तु ॥ इ
ति दक्षिणादिशं पश्यन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ॥ ततोऽपसव्येन
सपवित्रान् कुशान् पिण्डोपरि धृत्वा मंत्रपाठं विना घटकादिस्थजलादिना ॥
इदमूर्जं ते मया दीयते तेन वो पतिष्ठतामिति सपवित्रकुशोपरि दक्षिणाग्रां पयो
धारां दद्यात् ॥ दक्षिणादानम् ॥ विसर्जनं चान्ते सहैव भवति ॥ ततः पिण्डे सूत्रादिक
मुपनीय ॥ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य पिण्डः पितामहादिपिण्डैः सह संयो
जयिष्ये ॥ इत्युक्त्वा सुवर्णरजतकुशान् हस्तद्वयेनादाय ॥ ये समानाः समनसः
पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ ये समानाः स
मनसो जीवा जीवेषु मामकाः ॥ तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतꣳ स
माः ॥ इति मंत्रद्वयं पठित्वा प्रेतपिण्डं त्रिधा विभजेत् ॥ प्रतिविभागं मंत्रद्वयं पठे
त् ॥ ततः प्रथमपिण्डभागमादाय ॥ ये समानाः समनसः पितरो यमराज्ये ॥
तेषां ल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ ये समानाः समनसो जीवा
जीवेषु मामकाः ॥ तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतꣳ समाः ॥ सं
सृजतु त्वा पृथिवी वायुरग्निः प्रजापतिः ॥ संसृजध्वं च पूर्वेभिस्तिसृभिः पितृ
भिः सह ॥ संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ॥ देवा भागं यथा पूर्वे संजा
नानाऽउपासते ॥ समानो मंत्रः समितिः समानी समानं मनः सह चित्तमेषां समान
मंत्रमभिमंत्रये वः समानेन वो हविषा जुहोमि ॥ समानीव आहूतिः समाना हृद
यानि वः ॥ समानमस्तु वो मनो यथा वः सुसहासति ॥ मधुवातेति ऋचमपि पठे

दितिके चित् ॥ इति मन्त्रान् पठित्वा· अद्याऽमुकगोत्राऽमुकप्रेत अमुकगोत्रेण
स्वपित्राऽमुकशर्मणा वसुस्वरूपेण सह संसृजस्वेति वदन् ॥ पितामहपिण्डे
संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ एवं द्वितीयपिण्डभागमा
दाय ॥ पूर्वोक्तान् सर्वमन्त्रान् पठित्वा ॥ अद्याऽमुकगोत्राऽमुकप्रेत अमुकगोत्रे
ण स्वपितामहेनाऽमुकशर्मणा रुद्रस्वरूपेण सह संसृजस्व इति वदन् ॥ प्रपि
तामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ एवमेव तृतीयपिण्ड
भागमादाय पूर्वोक्तान् सर्वमन्त्रान् पठित्वा ॥ ॐ अद्याऽमुकगोत्र अमुकप्रेत अमुक
गोत्रेण स्वप्रपितामहेनाऽमुकशर्मणा आदित्यस्वरूपेण सह संसृजस्व इति वदन्
वृद्धप्रपितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ ततः पि
ण्डमेलनानन्तरं ॥ एषवोऽनुगतः प्रेतः पितृभागमवाप्नवान् ॥ शुभं भवतु क्षेमाणां
जायतां चिरजीविनः ॥ इति मन्त्रं पठेत् ॥ ततः पितृपूर्वकं पितामहादि त्रिरूप गंधपुष्पा
क्षतधूपदीपनैवेद्यादिभिः पिण्डत्रयमर्चयेत् ॥ मोटकादीन्यादाय ॥ ॐ अद्याऽमु
कगोत्रस्याऽस्मत्पितुरमुकशर्मणः सपिण्डीकरणश्राद्धे पिण्डे अमुकगोत्राः पि
तामह प्रपितामह वृद्धप्रपितामहा अमुकाऽमुकाऽमुकशर्माणो वसुरुद्रादित्यस्व
रूपास्तानि गंधपुष्पाक्षतधूपदीपनैवेद्यानि वः स्वधेति गन्धादिकमुत्सृजेत्
के चित् प्रेतपिण्डाऽवयवत्रयेण संयोजितां स्त्रीन्पिण्डानिदानीं तत्सुतमारभ्य पु
रुषत्रयायपार्वणं पुनरपि नामगोत्राद्युच्चार्य दद्यात् इत्याहुः ॥ ततः पितामहाद्यत्र
पात्रे क्रमेण प्रत्येकं ॥ ॐ शिवा आपः सन्तु इति जलम् · ॐ सौमनस्यमस्तु इति
पुष्पम् ॥ ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् ॥ दद्यात् ॥ ततः सव्यं कृत्वा ॥ कर्मपा
त्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिंचेत् ॥ ॐ अस्मत्कुले दीर्घमायुः ॥

रस्तु ॐ शान्तिरस्तु ॐ पुष्टिरस्तु ॐ तुष्टिरस्तु ॐ यच्छ्रेयस्तदस्तु ॥ ॐ यत्पापं प्र
तिहतमस्तु इति भूमौ ॥ ॐ द्विपदे चतुष्पदेभ्यः शान्तिरस्तु ॥ ततोऽपसव्यं कृत्वा
मोटकादिन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपिण्डी
करणनिमित्तकश्राद्धे अमुकगोत्रस्यास्मत्पितामहस्यामुकशर्मणो वसुस्व
रूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति पितामहायाक्षय्योदकं दत्वा ॥
पुनर्मोटकादिन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपिण्डी
करणनिमित्तकश्राद्धे अमुकगोत्रस्यास्मत्प्रपितामहस्यामुकशर्मणो रुद्र
स्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ॥ इति प्रपितामहायाक्षय्योदकं दत्वा
पुनर्मोटकादिन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपि
ण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्यास्मद्वृद्धप्रपितामहस्यामुकशर्मणः
आदित्यस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु ॥ इति वृद्धप्रपितामहाय
ऽक्षय्योदकं दत्वा ॥ सव्यं कृत्वा कृताञ्जलिर्दक्षिणां दिशमवलोकयन् ॥ ॐ
अघोराः पितरः सन्तु इति पितामहादिपिण्डत्रयोपरि पूर्वाग्रां जलधारां दद्यात्
॥ ततः सव्येनैव प्राङ्मुख आशिषः प्रार्थयेत् ॥ गोत्रन्नो वर्द्धताम् ॥ ॐ दातारो नो
ऽभिवर्द्धन्ताम् ॥ ॐ वेदाः सन्ततिरेव च ॥ ॐ श्रद्धा च नो माव्यगमत् ॥ वहुधेयञ्च नो
स्तु ॥ ॐ अन्नञ्च नो वहु भवेत् ॥ ॐ अतिथींश्च लभेमहि ॥ ॐ याचितारश्च नः सन्तु
ॐ मा च याचिष्म कञ्चन ॥ एताः सत्या आशिषः सन्तु इति ततः श्राद्धकर्त्ता तिलदर्भकुर्या
त् ॥ ॐ यत्कामं कामयते सोऽस्मै कामः समृद्ध्यताम् ॥ इति ततोऽपसव्यं कृत्वा ॥ पिण्डो
परि सपवित्रान् कुशनालीर्य्य ॥ जलादि सहितं पिण्डकं वामहस्ते कृत्वा ॥ ॐ ऊर्जं
वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ॥ स्वधा स्थ तर्प्पयत मे पितॄन् ॥ इति मन्त्रे

णं सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ॥ ततो नश्रीसूत्र पिण्डाना
म्घ्रायो॰धापयेत् ॥ पिण्डाधारकुशान् स्रुकं च वह्नौ क्षिपेत् ॥ सव्येन पिण्डिका
यां शंखं चक्रं च लिखेत् ॥ ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ ॐ शंखचक्राभ्यां
नमः ॥ इति यवैर्गन्धादिभिश्च शंखचक्रपूजां विधाय ॥ अपसव्यं कृत्वा ॥ तूष्णी
मेव पिण्डान् पिण्डिकोपरि निधाय पूजयेदभिमंत्रैः ॥ सव्येन ॥ ॐ वसन्ताय नम
स्तुभ्यं ग्रीष्माय च नमो नमः ॥ वर्षाभ्यश्च शरत्संज्ञकर्तवे च नमो नमः ॥ हेमन्ता
य नमस्तुभ्यं नमस्ते शिशिराय च ॥ मास सम्वत्सरेभ्यश्च दिवसेभ्यो नमो नमः
इति ततः सव्येन विश्वेदेवार्घपात्रं संचाल्य ॥ अपसव्येन पित्र्यर्घपात्रं संचा
ल्य पितामहार्घपात्राण्युत्तानी कृत्य ॥ दक्षिणां दद्यात् ॥ तत्र सव्येन कु
शयवजलदक्षिणाद्रव्याण्यादाय ॥ ॐ अद्याऽमुकगोत्रस्याऽस्मत्पितुरमु
कशर्मणः सपिण्डीकरणनिमित्तकानाममुकगोत्राणां पितामहप्रपितामहवृद्ध
प्रपितामह वृद्धप्रपितामहानाममुकाऽमुकाऽमुकशर्मणां वसुरुद्रादित्य
स्वरूपाणां श्राद्धसम्बन्धिनां कालकामविश्वेषां देवानां कृतैतच्छ्राद्धप्रतिष्ठा
र्थमिदं हिरण्यमग्निदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय द
क्षिणां तुभ्यमहं सम्प्रददे ॥ इति विश्वेदेवश्राद्धदक्षिणां दत्वा ॥ सर्वकर्माऽप
सव्येन दक्षिणादानवर्जितमिति यमदग्निवचनात्पित्रादिदक्षिणावाक्य
मपि सव्येनैव ॥ कुशतिलजलदक्षिणाद्रव्याण्यादाय ॥ ॐ अद्याऽमुकगोत्र
स्याऽस्मत्पितुरमुकशर्मणः कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रज
तं चन्द्रदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां दा
तुमहमुत्सृजेत् ॥ इति पितृश्राद्धदक्षिणां दत्वा ॥ पुनः कुशतिलजलदक्षि

राणडुच्चारणपादाय॥ ॐ अद्याऽमुकगोत्रस्याऽस्मत्पितुरमुकशर्मणः सपिण्डीक
रणनिमित्तकरुत्वेनदमुकगोत्राणां पितामहप्रपितामहवृद्धप्रपितामहाना
ममुकाऽमुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणां श्राद्धप्रतिष्ठार्थमिदं रज
तं चन्द्रदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं वि
भज्य दक्षिणान्दातुमहमुत्सृजेत्॥ इति पितामहादिदक्षिणां दद्यात्॥ ततः स
व्येनैव॥ ॐ कालकामविश्वेदेवाः प्रीयन्तामिति विश्वेदेवविसर्जनं कृत्वा॥ अप
सव्येन स्वस्तीति पितृविसर्जनं कृत्वा॥ ॐ वाजे वाजे वत वाजिनो धनेषु विप्रा अ
मृता ऋतज्ञाः॥ अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ इति पिता
महादीन् विसर्जयेत्॥ ततः सव्येन ॐ देवताभ्य इति त्रिः पठेत्॥ अपसव्येन रक्षोघ्नदी
पाच्छादनम् विधाय॥ सव्येन हस्तौ पादौ प्रक्षाल्याचमनं कुर्यात्॥ ततः ॐ प्रमादा
त्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
इति पठित्वा॥ स्नानफलकामो विष्णुस्मरणं कुर्यात्॥ श्राद्धीयवस्तूनि ब्राह्मणा
य दद्यात्॥ पिण्डाञ्जले प्रतिपादयेत्॥ सहगमने तु पित्रैकोद्दिष्टवन्मात्रेकोद्दिष्टं
सहैव विधाय पित्र्यर्घ्यपात्रे मेलयित्वा॥ ॐ अद्याऽमुकगोत्राया मातुरमुकप्रेताया
अर्घपात्रोदकं अमुकगोत्रस्य स्वभर्तुरर्घपात्रोदकेन संयोजयिष्ये इत्युक्त्वा मात्रर्घ
पात्रे गृहीत्वा॥ पूर्वोक्तान्मन्त्रान्पठित्वा पित्रर्घपात्रस्थतृतीयभागजलमुक्तपिता
महार्घपात्रस्थजले मेलयित्वा॥ ॐ अद्याऽमुकगोत्रे मातरमुकप्रेतेऽमुकगोत्रेण
स्वभर्त्रा सह साधुत्वं गच्छ॥ इति वदेत्॥ एवं पितृपिण्डसंयोजनानन्तरं ॐ अद्या
ऽमुकगोत्राया मातुरमुकप्रेतायाः पिण्डं स्वपितृपिण्डेन संयोजयिष्ये॥ इत्यु
क्त्वा मातृपिण्डमादाय सर्वान्मन्त्रान्पठित्वा॥ ॐ अद्याऽमुकगोत्रे मातरमुकप्रेते

अमुकगोत्रेण स्वभर्त्राऽमुकशर्मणा सह संसृजस्व ॥ इति वदेत् ॥ पितृपिण्डं प्र
थमभागत्रयं तु पितामहपिण्डे संयोज्य ॥ दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात्
मातृश्राद्धं दक्षिणे वाक्यं पृथक् कुर्यात् ॥ तच्चैव सव्येन कुशतिलजलं दक्षि
णाद्रव्याण्यादाय ॥ ॐ अद्याऽमुकगोत्राया अस्मन्मातुरमुकदेव्याः कृतैतत्सपि
ण्डीकरणनिमित्तश्राद्धप्रतिष्ठार्थं इदं रजतं चन्द्रदैवतं यथानामगोत्राय यथाना
मशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे ॥ इति विशेषः ॥ सहगमनाभावे मा
तुः सपिण्डीकरणे पितामह्यादिपिण्डत्रये मातृपिण्डं संयोजयेदिति ॥ मृतमातृको
मात्रादिपिण्डत्रये पत्न्याः पिण्डं संयोजयेत् ॥ अमृतमातृकस्तु पितामह्यादिपिण्ड
त्रये पत्न्याः पिण्डं संयोजयेदिति ॥ इति सपिण्डीकरणम् ॥ समाप्तम्

अथ पुनः पाथेयश्राद्धम् ॥ तच्च सपिण्डीकरणानन्तरं द्वादशेऽह्नि त्रयोदशेऽह्नि वा
पुनः पाथेयश्राद्धं कुर्यात् ॥ तच्च पार्वणमेकोद्दिष्टं वा यथाचारतः सिद्धान्नेनामा
न्नेन वा कुर्यात् ॥ तत्र क्रमः कर्ता स्नातः शुचिराचान्तः पूर्वोपलिप्त प्रज्वालितदीपं
स्थापित गौरसर्षपतिलादि रक्षोघ्नं श्राद्धदेशमागत्य पूर्वाभिमुख उपविश्य
॥ ॐ यद्देवा हेडन मित्यादि मन्त्रत्रयेण कर्मपात्रं कर्त्तव्यम् ॥ कुशजलेन ॐ अ
पवित्रः पवित्रो वा इत्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति स्वात्मानं श्राद्धदेशे
द्रव्याण्यात्मानञ्च सिञ्चेत् ॥ ततः कुशादिकमादाय ॥ अद्येत्यादि देशकालौ स्मृ
त्वा ॥ अद्याऽगोत्रस्याऽस्मत्पितुरमुकशर्मणः प्रेतलोकात् स्वर्गलोकगमने सुखसि
द्ध्यर्थं पाथेयश्राद्धं साम्वत्सरिकैकोद्दिष्टविधिनाऽहं करिष्ये ॥ इति संकल्पं कुर्या
त् ॥ तत्र वाक्ये पाथेयपदप्रक्षेप इति विशेषः ॥ नमो देवताभ्य इति त्रिः पठेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरुषसूक्त
[illegible]
[illegible]
[illegible]
[illegible]

ततोऽपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुर्मोटकादीन्यादाय ॥ ॐ
अद्याऽमुकगोत्रस्य अस्मत्पितुरमुकशर्मण इदमासनन्ते स्वधा ॥ ततः पुटके श्रा
देशमात्रपवित्रम् ॥ पवित्रे स्थ इति मंत्रेण दक्षिणाग्रं धृत्वा ॥ शन्नोदेवीरिति ज
लं दद्यात् ॥ तिलोसीति तिलान्दत्त्वा ॥ गंधद्वारामिति गंधम् ॥ श्रीश्चतेइति मंत्रेण पु
ष्पं क्षिपेत् ॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रमन्यपात्रोपरि ॥
ॐ नमो नारायणायेति मंत्रेणोत्तराग्रं धृत्वा दक्षिणहस्तेन तत्सुखमाच्छाद्य
॥ ॐ या दिव्या आपः पयसा इत्यादिनाऽर्घपात्रस्थजलमभिमन्त्र्य ॥ मोटकादी
न्यादाय ॥ ॐ अद्याऽमुकगोत्राऽस्मत्पितरमुकशर्मन् एष हस्तार्घस्ते स्वधेति
पवित्रोपरि अर्घजलं दत्वोत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रमासनवामपा
र्श्वे पितृस्थानमसीति न्युब्जं कुर्यात् ॥ तदुपरि कुशत्रयं दद्यात् ॥ ततो गंधादिना
सम्पूज्य ॥ मोटकादीन्यादाय ॥ ॐ अद्याऽमुकगोत्राऽस्मत्पितरमुकशर्मन् पाथे
यश्राद्धे एतानि गन्धपुष्पाक्षतधूपदीप पूगीफल वासांसि ते स्वधा इति गन्धा
दिकमुत्सृजेत् ॥ ततः आसनसहितस्याऽन्नपात्रस्य चतुर्दिक्षु चतुरस्रं मण्डलं वि
धाय ॥ श्राद्धीयान्नाग्रभागं तिलघृतमधुजलयुतमादाय मोटकादीन्यादाय
॥ ॐ इदमन्नं सजलं मेत कूस्वामि पितृभ्यो नम इत्युत्सृजेत् ॥ ततो व्यञ्जनं तिल
घृतमधुजलयुतमन्नमुपनीय मधुनाभिघार्य ॥ अधोमुखाभ्यां व्यस्ताभ्यां पाणि
भ्यांऽन्नपात्रमालभ्य ॥ ॐ पृथिवी ते इत्यादि ॥ जुहोमीत्यन्तम् ॥ ॐ इदं विष्णुरित्यादि
सुरेत्यन्तं च पठित्वा ॥ अपहता असुरा सत्र इत्यादिना ॥ तिलानन्नोपरि क्षिप्त्वा ॥
ॐ इदमन्नम् ॥ ॐ इमा आपः इदमाज्यम् ॐ इदं हविरिति उत्तरत्र ॥ एतान्युप
करणानि क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य ॥ मोटकादीन्या

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

दाय॥असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्॥उच्छिष्टभागधेयानां दर्भे
षु विकिरासनम्॥सतिलघृतमधुजलयुतमन्नमादाय जलेन आप्लाव्य॥मोटका
दीन्यादाय॥अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम॥भूमौ दत्तेन तृप्यन्तु
तृप्ता यान्तु परां गतिम्॥इत्युत्सृजेत्॥कुशान्परित्यज्य॥सव्येन हस्तौ पादौ प्रक्षा
ल्याचम्य॥विष्णुं स्मरेत्॥मधुवाता इत्यृचं पठेत्॥गायत्रीं स्मरेत्॥ततोऽपस
व्येन॥अन्नपात्रसमीपे पिण्डदानार्थं मृत्पिण्डिकां विधाय तत्र दर्भपिञ्जुलीं
गृहीत्वा॥अपहता असुरा रक्षांसि वेदिषद इति मन्त्रेण दक्षिणाग्रां रेखां कृत्वा उत्तरस्यां
क्षिपेत्॥ततो वेदिकायां छिन्नमूलकुशानास्तीर्य॥सव्येन देवताभ्य इतिति
पठेत्॥अपसव्यं कृत्वा॥मोटकादीन्यादाय॥ॐ अद्यामुकगोत्रास्मत्पितरमु
कशर्मन् पाथेय श्राद्धे पिण्डस्थाने इदमवनेजनं ते स्वधा॥इति कुशोपरि आसनं द
द्यात्॥ततस्तिलघृतमधुयुक्तेनान्नेन पिण्डं निर्माय॥जलतिलमोटकसहि
तं पिण्डमादाय॥ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् पाथेय श्राद्धे एष ते पि
ण्डस्ते स्वधा॥इति पिण्डं दद्यात्॥आस्तृतकुशमूलेन लेपभागभुजस्तृप्यन्तु॥इति
करं प्रोक्ष्य॥सव्यं कृत्वा आचम्य गन्धपुष्पादिकं गृहीत्वा पितरं उद्दिश्य॥ॐ अत्र
पितरो मादयध्वं यथाभागमावृषायध्वम्॥इति उत्तराभिमुखो भूत्वा पठेत्॥श्वा
सं नियम्य भास्वरमूर्तिं पितरं ध्यायन्॥अपसव्यं कृत्वा॥दक्षिणावर्तेन दक्षिणा
भिमुखो भूत्वा॥ॐ अमीमदन्त पितरो यथाभागमावृषायिषत॥इति मन्त्रेण गन्ध
पुष्पादिकानि पिण्डे निःक्षिपेत्॥ततो मोटकादीन्यादाय॥ॐ अद्याऽमुकगोत्रा
ऽस्मत्पितरमुकशर्मन् पाथेय श्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा॥इति प्रत्य
वनेजनं पिण्डोपरि दद्यात्॥ततो नीवीं विस्रस्य॥सव्यं कृत्वाचम्याऽपसव्यं कृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय ॥ ॐ नमो वः पितर इति मन्त्रेण पिण्डो
परि सूत्रं दद्यात् गन्धपुष्पादिभिः पिण्डं सम्पूज्य ॥ मोटकादीन्यादाय ॥ ॐ अद्या
मुकगोत्रास्मत्पितरमुकशर्मन् पाथेयश्राद्धे पिण्डे एतानि सूत्रगन्धपुष्पाक्षत
धूपदीपैक्षवादि नैवेद्यानि ते स्वधा ॥ इति गन्धादिकमुत्सृजेत् ॥ ततः शिवा आ
पः सन्त्विति जलम् ॥ ॐ सौमनस्यमस्त्विति पुष्पम् ॥ ॐ अक्षतं चारिष्टमस्त्विति
तण्डुलान् ॥ अत्र पात्रोपरि क्षिपेत् ॥ सव्यं कृत्वा कर्मपात्रोदकैः कुशैः प्रतिमेव
स्वशिरस्यभिषिञ्चेत् ॥ ॐ अस्मत्कुले इत्यादिभिर्मन्त्रैरभिषिञ्चेत् ॥ ततोऽपस
व्येन मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः पा
थेयश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु ॥ इति अर्घ्योदकं दत्वा ॥ सव्यं कृ
त्वा ॥ दक्षिणां दिशं पश्यन् ॥ अघोरः पितास्तु इति पूर्वाग्रां जलधारां दद्यात् ॥ तत
सव्येन प्राङ्मुख आशिषः प्रार्थयेत् ॥ ॐ गोत्रन्नो वर्द्धताम् ॥ इति प्रतिवचनम् ॥
ॐ दातारो नोऽभिवर्द्धन्ताम् ॥ ॐ वर्द्धन्तामिति प्रतिवचनम् ॥ ॐ वेदाः सन्ततिरे
व च ॥ ॐ सन्तु इति प्रतिवचनम् ॥ ॐ श्रद्धा च नो माव्यगमत् ॥ ॐ मागात् इति प्रति
वचनम् ॥ ॐ बहुदेयञ्च नोऽस्तु ॐ अस्तु इति प्रतिवचनम् ॥ ॐ अन्नञ्च नो बहु भवे
त् ॥ ॐ भवत्विति प्रतिवचनम् ॥ अतिथींश्च लभेमहि ॥ ॐ लभध्वम् ॥ इति प्रतिवचन
म् ॥ ॐ याचितारश्च नः सन्तु ॥ ॐ सन्त्विति प्रतिवचनम् ॥ ॐ मा याचिष्म कञ्चन ॥
मा यांचेथा इति प्रतिवचनम् ॥ एता सत्या आशिषः सन्तु ॥ ॐ सन्त्विति प्रतिवच
नम् ॥ ततः श्राद्धकर्त्ता तिलकं कुर्यात् ॥ अपसव्यं कृत्वा ॥ पिण्डोपरि सपवित्रान् कुश
नास्तीर्य ॥ जलादि सहितं पूरकं वामहस्ते कृत्वा ॥ ॐ ऊर्जं वहन्तीरित्यादि मन्त्रेण द
क्षिणाग्रां पयोधारां पिण्डोपरि दद्यात् ॥ ततो नम्रीभूय पिण्डमाघ्राय स्थापयेत् ॥

पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिपेत्॥ सव्येन पिण्डिकायां शंखं चक्रं च
लिखेत्॥ ॐ शंखाय नमः॥ ॐ चक्राय नमः॥ इति यवैः शंखचक्रमुद्रां विधाय
॥ अपसव्यं कृत्वा तूष्णीमेव पिण्डं पिण्डिकोपरि निधाय॥ ॐ वसन्तायेत्यादि
भिर्मन्त्रैः सव्येन पूजयेत्॥ ततोऽपसव्येनार्घपात्रमुत्तानीकृत्य॥ सव्येन दक्षिणां
द्रव्यं कुशादिसहितमादाय॥ ॐ अद्याऽमुकगोत्रस्याऽस्मत्पितुरमुकशर्मणः
कृतैतत्पाथेयश्राद्धप्रतिष्ठार्थं इदं रजतं चन्द्रदैवतं यथानामशर्मणे ब्राह्मणा
य दक्षिणां दातुमहमुत्सृजे॥ इति दक्षिणां दद्यात्॥ ततोऽपसव्येन ॐ वाजे
वाजे इति पितॄन् विसर्जयेत्॥ ततः सव्येन ॐ देवताभ्य इति त्रिः पठेत्॥ अपस
व्येन दीपाच्छादनम्॥ विधाय सव्येन हस्तौ पादौ प्रक्षाल्याचम्य॥ ॐ प्रमा
दात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादि
ति श्रुतिः॥ इति पठित्वा विष्णुं स्मरेत्॥ आच्छीय वस्त्रं ब्राह्मणाय प्रतिपा
दयेत्॥ इति पाथेयश्राद्धम्॥ अथ मङ्गलार्थं विनायकं पूजयेत्॥

॥ शुभम्॥

पात्राण्यादाय॥कुशतिलजलान्यादाय॥अद्येह...... गोत्र ...... प्रे
तइमानि सतिलतोयपूर्णपुटकपात्राणि तेमयादीयंते तवोप
तिष्ठंताम्॥एते सतिलतोयपूर्णपुटपात्राणि पिंडसमीपेउत्सृजेत्
॥ततः त्रिकाष्ठिकयोः पुटपात्रद्वये नीरं क्षीरं चादाय॥अद्येह......
......गोत्र ......प्रेत इमे त्रिकाष्ठिकास्थित नीरक्षीरयुत पुटपात्रे तेम
यादीयेते तवोपतिष्ठेताम्॥इत्युत्सृज्य॥श्मशानानलदग्धोसि
परित्यक्तोसि बान्धवैः॥इदं नीरं इदम् क्षीरम् अत्र स्नाहि इदं पिब
॥इतिपठेत्॥ततः सतिलसुशीतलजलेपूर्णघटं मध्ये कृत्वा॥अद्ये
ह...... गोत्र ......प्रेत एष सतिल सुशीतलजलोपेतो घटस्ते मया
दीयते तवोपतिष्ठताम्॥इत्युत्सृज्य॥सुशीतलजलोपेतः सर्वोप
स्कर संयुतः॥एष घटो मया दत्तः प्रेताय उपतिष्ठताम्॥इतिपठेत्॥ततः
सव्येन॥अनादिनिधनोदेवशंखचक्रगदाधरः॥अक्षय्यपुण्डरी
काक्षप्रेतमुक्तिप्रदोभव॥इतिपठेत्॥ततः लोहदक्षिणांकुश
तिलजलान्यादाय॥अद्येह...... गोत्रस्य ......प्रेतस्यपुरीषभक्ष
नामनरकोत्तारणाय कनलोमादिपूरकः अष्टमपिण्डदानप्रति
ष्ठार्थं इदं लोहं पलपरिमितं यमदैवतं दक्षिणात्वेन दातुमहमुत्सृ
जेत्॥इत्युत्सृज्य॥तत्सर्वंजले क्षिपेत्॥ततः पिण्डदानानन्तरं आ
चारः प्राप्तस्नानं कुर्यात्॥अष्टमदिनसंबंधि अवयपिण्डदानान
न्तरं पिप्पलादिवृक्षेजलपूर्णघटं मध्ये कृत्वा॥तत्रवाक्यम्॥कुशतिल
जलान्यादाय॥आकाशेतु निरालंबे वायुभूतो निराश्रयः॥एषघटो
मयादत्तः प्रेताय उपतिष्ठताम्॥इत्युत्सृजेत्॥कर्त्ता भोजनसमयेप
ञ्चकारौ सघृतमन्नं कृत्वा अपसव्येन कुशेजलं गृहीत्वा काकब

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

लिं दद्यात् ॥ अनेनमंत्रेण ॥ काकोसि यमदूतोसि गृहाण बलिमुत्त
मम् ॥ यमद्वारे महाघोरे त्वमाप्यायितुमर्हसि ॥ यमाय धर्मराजा
य मृत्यवे चान्तकाय च ॥ दक्षिणां दिशमाश्रित्य प्रेतान्नं बलिमा
हरेत् ॥ इति पठेत् ॥ सर्व्वं कृत्वा लवणादि विनैव घृतसर्करादिसहितम
न्नम् स्वयं भुञ्जीत ॥ ततः सायंकाले प्राङ्गणे गोमयोपलिप्ते त्रिका
ष्ठिकोपरि पुरःकादौ दीपं पानीयं पुष्पं संस्थाप्य आशौचान्तं प्र
त्यहं दद्यात् ॥ तत्र अपसव्येन ॥ कुशतिलजलान्यादाय ॥ अद्य......
......गोत्र......प्रेत अष्टम दिन संबंधि सायंकाले एष दीपस्ते मया
दीयते तवोपतिष्ठताम् ॥ अद्येह......गोत्र......प्रेत अष्टम दिन संबंधि
सालेइदं पानीयन्ते मया दीयते तवोपतिष्ठताम् ॥ अद्येह...गोत्र
...प्रेत अष्टम दिन संबंधि सायंकालेइदं पुष्पं ते मया दीयते त
वोपतिष्ठताम् ॥ इत्युत्सृज्य ॥ अनेन पुष्प इदं पिव इदं परिधेहि ॥
इति वदेत् ॥ इति अष्टमीदिनकृत्यम् ॥

अथ नवमी दिन कृत्यम् ॥ ततः कर्तो जलाशयं गत्वा दक्षिणाभिमुखः
एकवस्त्रधरो वामकरस्य अनामिकया अपनः शाशुचदघमितिद
क्षिणतो जलं नीत्वा ॥ कुशतिलजलान्यादाय ॥ अद्येह......गोत्रस्य
प्रेतस्य नवमी दिने एषपाषाणोपरि तिलतोयाञ्जलिदानार्थं पिण्ड
दानार्थं च स्नानमहं करिष्ये ॥ इति सङ्कल्पः ॥ अपसव्यं कृत्वा दक्षि
णाभिमुखः तूष्णीं निमज्जेत् ॥ अंगं च न निघर्षयेत् ॥ पुनर्द्विवासा भू
त्वा आचम्य कुशोपरि स्थापित पाषाणोपरि ॥ अपसव्येनैव ॥ कु

शतिलतोयाञ्जलिं गृहित्वा॥ अद्येह ...... गोत्र ...... प्रेत नवम दिने
स्वपापारणे परि तिलतोयाञ्जलयः ते मयादीयन्ते तवोपतिष्ठ
ताम्॥ इति पापारणे तिलतोयाञ्जलिं वर्द्धमानं दत्वा॥ सव्यं कृत्वा
पूर्वाभिमुखो भूत्वा॥ नित्यस्नानं कृत्वा॥ किञ्चित् गायत्रीं जप्त्वा
श्वेत धौत वस्त्रं परिधाय॥ श्राद्धदेशमागत्य पाकं संपाद्य॥ अथ
प्रयोगः॥ दीपं प्रज्वाल्य कर्ता कुशहस्तः सोत्तरीय आचम्य अप
सव्यं कृत्वा॥ दक्षिणाभिमुखः पातितवामजानु वेदिकायां द
क्षिणाग्रान् कुशान् आस्तीर्य॥ अथ प्रतिज्ञासंकल्पः॥ कुशति
लजलान्यादाय॥ अद्येह ...... गोत्रस्य ...... प्रेतस्य स्वमांसभक्षना
मनरकोत्तारणाय वीर्यपूरकः नवमदिननिमित्तं पिण्डदानम
हं करिष्ये॥ पुनः कुशतिलजलान्यादाय॥ अद्येह ...... गोत्र ......
प्रेत नवमं दिनसंबंधि नवमपिण्डस्थाने इदं अवनेजनं ते मयादी
यते तवोपतिष्ठताम्॥ इति आस्तृत कुशोपरि पितृतीर्थेन अव
नेजनं दद्यात्॥ ततः तिलघृतमधुयुक्तं पिण्डं कुशतिलजलसहि
तमादाय॥ अद्येह ...... प्रेत स्वमांसभक्षनामनरकोत्तारणाय वीर्य
पूरकः नवमपिण्डस्ते मयादीयते तवोपतिष्ठताम्॥ इति अवनेजन
स्थाने पिण्डं दद्यात्॥ ततः कुशतिलजलान्यादाय॥ अद्येह ...... गोत्र
...... प्रेत इदं पिण्डप्रत्यवनेजनं ते मयादीयते तवोपतिष्ठताम्॥ इति
पिण्डोपरि प्रत्यवनेजनं दद्यात्॥ ततः प्रेतमुद्दिश्य पत्नूर्णी मेवडशिरश्च
न्दन ऊर्णासूत्र भृंगिराज पत्र पूगीफल व्याक्षत धूप दीप नैवेद्यैः
पिण्डमभ्यर्च्य॥ कुशतिलजलान्यादाय॥ अद्येह ...... गोत्र ...... प्रेत
एतानि पिण्डस्योपरि चन्दनोर्णासूत्र भृंगराज पत्र पूगीफलव्या

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्रगधूपदीपैक्षवादिनैवेद्यानि ते मया दीयन्ते नवोपतिष्ठताम्॥ इत्युत्सृ
जेत्॥ ततः कुशतिलजलान्यादाय॥ अद्येह ...... गोत्र ...... प्रेत एते सतिल
तोयाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठताम्॥ इति नवम तिलतोयाञ्ज
लयः पिण्डोपरि दद्यात्॥ ततः सतिलतोयपूर्णपुटकपात्राण्यादाय॥
कुशतिलजलान्यादाय॥ अद्येह ...... गोत्र ...... प्रेत इमानि सतिलतो
यपूर्णपुटकपात्राणि ते मया दीयन्ते तवोपतिष्ठताम्॥ इति सतिल
तोयपूर्णपुटकपात्राणि पिण्डसमीपे उत्सृजेत्॥ ततः त्रिकाष्ठिकयोः
पुट पात्रद्वये नीरम् क्षीरं चादाय॥ अद्येह ...... गोत्र ...... प्रेत इमे त्रि
काष्ठिकास्थितनीरक्षीरयुत पुटपात्रे ते मया दीयेते तवोपतिष्ठेता
म्॥ इत्युत्सृज्य॥ श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः॥ इदं नी
रं इदं क्षीरम् अत्र स्नाहि इदं पिब॥ इति पठेत्॥ ततः सतिलकुशतिल
जलपूर्णं घटमग्रे कृत्वा॥ अद्येह ...... गोत्र ...... प्रेत एष सतिलकुशति
तलजलोपेतो घटस्ते मया दीयते तवोपतिष्ठताम्॥ इत्युत्सृज्य॥ कुशति
तलजलोपेतः सर्वोपस्कर संयुतः॥ एष घटो मया दत्तः प्रेताय उपति
ष्ठताम्॥ इति पठेत्॥ ततः सव्येन॥ अनादिनिधनो देव शंखचक्रगदा
धर॥ अक्षय्य पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव॥ इति पठेत्॥ ततः लोह
दक्षिणां कुशतिलजलादिसहितमादाय॥ अद्येह ...... गोत्रस्य
प्रेतस्य स्वमांसभक्ष नाम नरकोत्तारणाय वीर्यपूरक नवमपिण्डदा
नप्रतिष्ठार्थं इदं लोहं पलपरिमितं यमदैवतं दक्षिणात्वेन दातुम
हमुत्सृजेत्॥ इत्युत्सृज्य॥ तत्सर्वं जले क्षिपेत्॥ ततः पिण्डदानानन्तरं
आचार प्राप्त स्नानं कुर्यात्॥ नवम दिन संबंधि अवयव पिण्डदा
नानन्तरं पिप्पलादि वृक्षसमीपे गत्वा॥ तत्र वाक्यम्॥ कुशतिलज
लान्यादाय॥ आकाशेऽत्र निरालंबो वायुभूतो निराश्रयः॥ एष घटो

मयादत्तप्रेताय उपतिष्ठताम् ॥ इत्युत्सृजेत् ॥ कर्तृभोजनसमये पु
ष्करादौ सघृतमन्नं कृत्वा अपसव्येन ॥ हस्ते जलं गृहित्वा काकबलिं
दद्यात् ॥ अनेन मन्त्रेण ॥ काकोसि यमदूतोसि गृहाण बलिमुत्तम
म् ॥ यमद्वारे महाघोरे त्वमाप्यायितुमर्हसि ॥ यमाय धर्मराजाय
मृत्यवे चान्तकाय च ॥ दक्षिणां दिशमाश्रित्य प्रेतान्नं बलिमाहरेत् ॥
इति पठेत् ॥ सव्यं कृत्वा लवणादिविनैव घृतसर्करैडुकसहितमन्नं
स्वयं भुञ्जीत ॥ ततः सायंकाले प्राङ्गणे गोमयोपलिप्ते त्रिकाष्ठि
कोपरि पुष्करादौ दीपं पानीयं दुग्धं संस्थाप्य आशौचान्तं प्रत्यहं
दद्यात् ॥ तत्र अपसव्येन ॥ कुश तिलजलान्यादाय ॥ अद्येह ...... गो
त्र ...... प्रेत नवमदिन संबंधि सायंकाले एष दीपस्ते मया दीयते तवो
पतिष्ठताम् ॥ अद्येह ...... गोत्र ...... प्रेत नवमदिन संबंधि सायंका
ले पानीयं ते मया दीयते तवोपतिष्ठताम् ॥ अद्येह ...... गोत्र ...
...... प्रेत नवमदिनसंबंधि सायंकाले इदं दुग्धं ते मया दीयते तवो
पतिष्ठताम् ॥ इत्युत्सृज्य ॥ अनेन पश्य इदं पिव इदं परिधेहि
॥ इति वदेत् ॥ नवमदिने वाससां त्यागः इत्युक्तत्वात् तस्मिन् दिने
प्रक्षालनं दानं च स्नानसमये ॥ इति नवमी दिन कृत्यम् ॥

अथ दशमी दिन कृत्यम् ॥ ततः कर्ता जलाशयं गत्वा दक्षिणाभि
मुख एकवस्त्रधरो वामकरस्य अनामिकया अपनः शोशुचदघ
मिति दक्षिणतो जलं नीत्वा ॥ कुश तिलजलान्यादाय ॥ अद्येह ......
...... गोत्रस्य ...... प्रेतस्य दशमदिने एष पाषाणोपरि तिलतोया
ञ्जलिस्तृप्त्यर्थं पिण्डदानार्थं च स्नानमहं करिष्ये ॥ इति संकल्पः

अपसव्यं कृत्वा ॥ दक्षिणाभिमुखः तूष्णीं निमज्जेत् ॥ अंगं चन निघर्षेयुः
॥ पुनर्द्विवासा भूत्वा· आचम्य कुशोपरि स्थापित पाषाणोपरि ॥ अपस
व्येनैव ॥ कुशतिलतोयाञ्जलिं गृहित्वा ॥ अद्येह ······ गोत्र ····· प्रेत दश
मदिने एष पाषाणोपरि तिलतोयाञ्जलयः ते मया दीयतेनेन वोपति
ष्ठताम् ॥ इति पाषाणे तिलतोयाञ्जलि वर्द्धमानं दत्वा ॥ सव्यं कृत्वा
पूर्वाभिमुखो भूत्वा ॥ नित्यस्नानं कृत्वा ॥ किञ्चित् गायत्रीं जप्त्वा ॥ श्वे
तधौत वस्त्रं परिधाय ॥ श्राद्धदेशमागत्य पाकं संपाद्य ॥ अथ प्रयोगः
॥ दीपं प्रज्वाल्यः ॥ कर्णो कुशहस्तः सोतरीय आचम्य अपसव्यं कृत्वा
॥ दक्षिणाभिमुखः पातित वामजानु वेदिकायां दक्षिणाग्रान् कुशा
न् आस्तीर्य ॥ अथ प्रतिज्ञा संकल्पः ॥ कुशतिलजलान्यादाय ॥ अ
द्येह ······ गोत्रस्य ······ प्रेतस्य कुम्भीपाक नाम नरकोत्तारणाय पू
र्णतान्त्रताशुद्धि पर्यय हेतुको दशमदिन निमित्तं पिण्डदानमहं क
रिष्ये ॥ पुनः कुशतिलजलान्यादाय ॥ अद्येह ······ गोत्र ····· प्रेत दश
मदिन संबंधि दशम पिण्ड स्थाने इदं अवनेजनन्तेन मया दीयतेनेन वोप
तिष्ठताम् ॥ इति आस्तृत कुशोपरि पितृतीर्थेन अवनेजनं दद्यात् ॥
ततः तिलघृतमधुयुक्तं पिण्डं कुशतिलजलसहितमादाय ॥ अद्येह ··
······ प्रेत कुम्भीपाक नाम नरकोत्तारणाय पूर्णतान्त्रताशुद्धि पर्यय
हेतुको दशम दिन संबंधि दशम पिण्डस्तेन मया दीयतेनेन वोपतिष्ठता
म् ॥ इति अवनेजन स्थाने पिण्डं दद्यात् ॥ ततः कुशतिलजलान्यादा
य ॥ अद्येह ······ गोत्र ······ प्रेत इदम् पिण्ड प्रत्यवनेजनं तेन मया दीयतेनेन
वोपतिष्ठताम् ॥ इति पिण्डोपरि प्रत्यवनेजनं दद्यात् ॥ ततः प्रेतमुद्दि
श्य तुलसीमेव उशीर चन्दन उर्णासूत्र भृंगिराज पत्र पूगीफल पुष्पा
क्षत धूप दीप नैवेद्यैः पिण्डमभ्यर्च्य ॥ कुशतिलजलान्यादाय ॥ अद्ये
ह ····· गोत्र ······ प्रेत एतानि पिण्डस्थो शीर चन्दनोर्णासूत्र भृंग

राजपत्रपूगीफलपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यानितेमयादी
यंतेतवोपतिष्ठंताम्॥इत्युत्सृजेत्॥ततःकुशतिलजलान्यादाय॥
अद्येह......गोत्र......प्रेतएतेसतिलतोयाञ्जलयस्तेमयादीयंतेत
वोपतिष्ठंताम्॥इतितिलतोयाञ्जलयपिण्डोपरिदद्यात्॥ततःस
तिलतोयतोयपूर्णघटपात्रमादाय॥कुशतिलजलान्यादाय॥
अद्येह......गोत्र......प्रेतइमानिसतिलतोयपूर्णघटकपात्राणि
तेमयादीयंतेतवोपतिष्ठंताम्॥इतिसतिलतोयपूर्णघटकपात्रा
णिपिण्डसमीपेउत्सृजेत्॥ततःत्रिकाष्ठिकयोःघटपात्रद्वयेनीरं
क्षीरंचादाय॥अद्येह......गोत्र......प्रेतइमेत्रिकाष्ठिकास्थितनी
रक्षीरयुतघटपात्रेतेमयादीयेतेतवोपतिष्ठेताम्॥इत्युत्सृज्य
श्मशानानलदग्धोसिपरित्यक्तोसिबान्धवैः॥इदंनीरमिदंक्षी
रं अत्रस्नाहि इदं पिब॥इतिपठेत्॥ततःसतिलसुशीतलजलपू
र्णघटमग्रेकृत्वा॥अद्येह......गोत्र......प्रेतएषसतिलसुशीतल
जलोपेतोघटस्तेमयादीयतेतवोपतिष्ठताम्॥इत्युत्सृज्य॥सुशीत
लजलोपेतःसर्वोपस्करसंयुतः॥एषघटोमयादत्तःप्रेतायउपतिष्ठ
ताम्॥इतिपठेत्॥ततःसव्येन॥अनादिनिधनोदेवशंखचक्रगदा
धर॥अक्षय्यपुण्डरीकाक्षप्रेतमोक्षप्रदोभव॥इतिपठेत्॥ततःलो
हदक्षिणांकुशतिलजलादिसहितमादाय॥अद्येह......गोत्रस्य......
प्रेतस्यकुम्भीपाकनामनरकोत्तारणायपूर्णतागतक्षुद्विप
र्ययापहेतुकोदशमपिण्डदानप्रतिष्ठार्थंइदंलोहंपलपरिमितम्
यमदैवतम्दक्षिणात्वेनदातुमहमुत्सृजे॥इत्युत्सृज्य॥इतिदक्षि
णांदद्यात्॥ततःसर्वंजलेक्षिपेत्॥

एवं दश पिण्डान् प्रदाय पिण्डिका प्रक्षालनीया तदुपरि अखण्ड
दीपं निधाय तं पूजयित्वाऽपसारयेत् ॥ आमान्नं च पिण्डिकया संयोज्या
पसारयेत् ॥ तदनन्तरं च हिरण्मयीं कुद्दालिकां रजतं कुद्दालकं वा दाय
नाम्ना प्रथमं पश्चिमां दिशामारभ्य प्राचीं यावत् ततश्च उदीचीमारभ्य
दक्षिणां यावत् अविच्छिन्नया रेखया पिण्डिकां विदारयेत् ॥ ततश्च तदु
भयमन्यत्र निदध्यात् ॥ ततः सा पिण्डिका मातुः पितुः पत्युर्वा चेत् शिरसा
ऽऽस्कन्दनीया भ्रातृप्रभृतिबन्धूनां चेत् अंसेन स्त्रियाश्चेज्जानुनाऽऽस्क
न्दनीया ततश्च काष्ठत्रिकेण प्रस्तरेण दिना वा पिण्डिकां सम्यग्भङ्क्त्वा
चूर्णीकृत्य प्रसारयेत् ॥ ततो मणिकस्य धान्यसप्तकं स्वपश्चाद्भागेन प्र
तिकूलाभ्यां हस्ताभ्यां तत्र विकीर्य काष्ठत्रिकं च भङ्क्त्वा मणिकेन दी
पं पिधाय तं पिप्पलावलम्बितं घटं च भञ्ज्यात् अरण्यं तत्स्थानात्कि
ञ्चिदन्तरं वा गत्वा परिहितान्यशुक्लाम्बरे ब्राह्मणः कर्त्रे शिरसि क्षौ
रकर्मणीव दर्भेण सर्वतः स्पृशेत् ॥ ततः कर्त्ता नापितेन शिरो मुण्ड
यित्वा स्पृष्टान्यवस्त्रं त्यक्त्वा तिलकल्कगौरसर्षपैः शिरः संस्नाप्य पुन
ः सर्वाङ्गं स्नात्वाऽन्यत् यज्ञोपवीतमामुच्य कृतस्नानेन आमूलात्म
यज्ञोपवीतेन ब्राह्मणेन सह पञ्चगव्यं प्राश्य धौतवस्त्रयुग्मं परि
धाय गां स्पृष्ट्वा अन्येन मार्गेण गृहं गत्वा दशदिनं यावत् यत्र स्थि
तं तत्स्थानं तत्स्थानं विहाय स्थानान्तरे स्थातव्यम् ॥ इत्ययं कुलाचा
रः ॥ न चात्र मन्त्रा उपलभ्यन्ते इति सर्वमेतदमन्त्रकं तूष्णीं विधेय
मिति दिक् ॥ ॥ ॥ ॥

अथ अस्थिसंचयनश्राद्धम्॥ तत्र अस्थिसंचयनात्पूर्वं संचयनानन्त
रम्वा सिद्धान्नेन वा कुर्यात्॥ आमश्राद्धे यवचूर्णेन पिण्डः कर्त्तव्यः॥
अथ प्रयोगः॥ कर्त्ता स्नानादिकं विधाय श्राद्धभूमिं सर्षपैस्तिलै
श्चावकीर्य॥ रक्षादीपं संस्थाप्य श्राद्धदेयानि वस्तून्यासाद्याचम्य॥
पूर्वाभिमुख उपविश्य॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि
वा॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥ पुण्डरीकाक्षः
पुनातु॥ इति श्राद्धीयद्रव्याणि॥ कुशतिलजलेन सिंचेत्॥ ततः कु
शतिलजलान्यादाय॥ अद्येह...... गोत्रस्य...... प्रेतस्य अस्थिसं
चयननिमित्तकमेकोद्दिष्टश्राद्धमहं करिष्ये॥ इति संकल्पं कुर्यात्
॥ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च॥ नमः स्वाहायै स्वधा
यै नित्यमेव नमो नमः॥ इति त्रिः पठेत्॥ ततोऽपसव्यं कृत्वा दक्षिणा
भिमुखः पातितवामजानुः कुशादीन्यासाद्य॥ अद्येह...... गोत्रस्य
प्रेतस्य इदमासनं ते मया दीयते तवोपतिष्ठताम्॥ इति कुशासनमा
सनं दद्यात्॥ ततः पुटके प्रादेशमात्रं कुशपत्रद्वयात्मकं॥ पवित्रं॥
पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सू
र्यस्य रश्मिभिः॥ इति मन्त्रेण पवित्रं दक्षिणाग्रान्धृत्वा॥ ॐ शन्नो दे
वीरभिष्टय आपो भवन्तु पीतये॥ शंय्योरभिस्रवन्तु नः॥ इति मन्त्रेण
जलम्॥ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्मितः॥ प्रत्नवद्भिः
संपृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा॥ इति तिलान्॥
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्या
त्तम्॥ इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥ इति पु
ष्पाणि॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्॥ ई

करीषिणीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ इति गंधम्॥ ततस्तदर्घ
पात्रं वामहस्ते कृत्वा॥ पवित्रसपुष्पं अन्नपात्रोपरि नमो नाराय
णाय॥ इति मंत्रेणोत्तानं कृत्वा॥ या दिव्याऽआपः पयसा संबभू
वुर्याऽअन्तरिक्षाऽउत पार्थिवीर्याः॥ हिरण्यवर्णा यज्ञियास्तान
ऽआपः शिवाशꣳस्योनाः सुहवा भवन्तु॥ इत्यनेन हस्तार्घपात्रस्थ
जलमभिमंत्र्य कुशादिकमादाय॥ अद्येह ...... गोत्र ...... प्रेतस्यैष
हस्तार्घस्ते मया दीयते तवोपतिष्ठताम्॥ इति पवित्रोपरि अर्घ
जलं उत्सृजेत्॥ ततः पवित्रसहितमर्घपात्रं आसनस्य वामपार्श्वे प्रे
तायस्थानमसीति उत्तानमेवस्थापयेत्॥ ततोभ्यर्च्य॥ कुशादीनादा
य॥ अद्येह ...... गोत्र ...... प्रेत अस्थिसंचयनश्राद्धे एतानि गंधपु
ष्पाक्षत धूपदीपनैवेद्यपुंगीफलवासांसि ते मया दीयन्ते तवोप
तिष्ठन्ताम्॥ इति गंधादिकं उत्सृजेत्॥ ततश्चतुष्कोणमण्डलं वि
धाय॥ श्राद्धीयान्नाग्रभागे घृत तिल जल मधु कुश मन्त्र मादाय॥
इदमन्नं सजलमेतद्भूस्वामि पितृभ्यो नमः॥ इत्युत्सृजेत्॥ अथा
न्नसंकल्पः॥ सोपस्करं तिल घृत मधु जल कुश मन्न ग्रपनीय मधुना
भिघार्य पात्रालंभनाऽवगाहनं विना॥ पृथिवी ते पात्रं द्यौर् पिधानं
ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा॥ इदं विष्णु विचक्र
मे त्रेधा निदधे पदम्॥ समूढमस्यपाꣳसुरे इति पठित्वा॥ अप
हता असुरा रक्षाꣳसि वेदिषदः॥ इति तिलान् तदुपरि विकीर्य॥
कुशादिमादाय॥ अद्येह ...... गोत्राय ...... प्रेताय इदमन्नं सो
सोपस्करान्नं मया दीयते तवोपतिष्ठताम्॥ इत्युत्सृजेत्॥ सव्येन
॥ मधुवाताऽऋतायते मधु क्षरन्ति सिन्धवः॥ माध्वीर्नः सन्त्वोष
धीः॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः॥ मधु द्यौरस्तु नः
पिता॥ मधुमान्नो वनस्पतिर्मधुमाꣳऽअस्तु सूर्यः॥ माध्वीर्गावो

भवन्तु नः॥ इत्याशिषां पाठः॥ मधु मधु मध्विति॥ अन्नहीनं
क्रियाहीनं विधिहीनं च यद्भवेत्॥ तत्सर्वं मच्छिद्रमस्तु भास्करस्य
प्रसादतः॥ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे॥ नमः पिनाक
हस्ताय वज्रहस्ताय वै नमः॥ इति श्लोकं पठेत्॥ ततोन्नपात्रसमी
पे पिण्डदानार्थम् त्रिपिण्डिकां विधाय मंत्रैरेवोल्मुकभ्रमणं विना छि
न्नमूलकुशानास्तीर्य॥ कुशजलान्यादाय॥ अद्येह ...... गोत्र ...... प्रे
त अस्थिसंचयनश्राद्धे पिण्डस्थाने इदं अवनेजनन्ते मया दीयते त
वोपतिष्ठताम्॥ इति कुशोपरि अवनेजनं दद्यात्॥ ततो घृतमधु
तिलयुक्तेनान्नेन पिण्डं निर्माय॥ जलतिलकुशसहितं पिण्डमा
दाय॥ अद्येह ...... गोत्र ...... प्रेत अस्थिसंचयनश्राद्धे एष पिं
डस्ते मया दीयते तवोपतिष्ठताम्॥ इत्यवनेजनस्थाने दक्षिण
हस्तेन पिण्डं दद्यात्॥ तत आस्तृत कुशमूलेन लेपभागभुजस्तृ
प्यन्तु॥ इति करं प्रोक्ष्य॥ पिण्डशेषान्नं पिण्डसमीपे विकिरेत्॥
सव्यं कृत्वा आचम्य॥ अपसव्यं कृत्वा तूष्णीं भास्करमूर्तिं प्रेतं
चिन्तयेत्॥ ततः कुशादिमादाय॥ अद्येह ...... गोत्र ...... प्रेत इदं पिं
डप्रत्यवनेजनन्ते मया दीयते तवोपतिष्ठताम्॥ इति पिण्डोपरि प्रत्य
वनेजनं दद्यात्॥ ततो नीवीं विस्रस्य॥ सव्यं कृत्वाचम्य॥ अपसव्यं
कृत्वा वामहस्तेन सूत्रमादाय करण्यां गृहीत्वा॥ प्रेतैतत्ते वासः॥
इति पिण्डोपरि सूत्रं धृत्वा॥ गंधद्रव्यादिना पिण्डं संपूज्य॥ कु
शादीन्यादाय॥ अद्येह ...... गोत्र ...... प्रेत अस्थिसंचयनश्राद्धे
एतानि पिण्डार्चनानि अत्र गंधद्रव्याक्षत धूपदीपनैवेद्यानि ते
मया दीयन्ते तवोपतिष्ठन्ताम्॥ इति गंधादिकमुत्सृजेत्॥ ततः
शिवा आपः सन्तु इति जलम्॥ सौमनस्यमस्तु इति द्रव्यं॥ अक्षतं
चारिष्टमस्तु इति तण्डुलान्॥ अन्नपात्रोपरि क्षिपेत्॥ ततः कुशादि

स्पादाय॥ अद्येह ······ गोत्रस्य ······ प्रेतस्य अस्थिसंचयनश्राद्धे
दत्तैतदन्नपानादिकमुपतिष्ठताम्॥ इत्यक्षय्योदकं दत्वा॥ सव्यं
कृत्वा दक्षिणां दिशं पश्येत्॥ अघोरः प्रेतोस्तु॥ इति पूर्वोयांजल
धारां पिण्डोपरि दद्यात्॥ ततोऽपसव्यं कृत्वा॥ सपवित्रान् कुशान्
आस्तीर्य्य॥ पुटकस्थजलादिना इदं उर्जंते मया दीयते तवोप
तिष्ठताम्॥ इति सपवित्रकुशोपरि दक्षिणाग्रान् [illegible]धारान्
दद्यात्॥ ततः पिण्डमाद्यायोऽत्थापयेत्॥ छिन्नमूलकुशानग्नौ
दहेत्॥ अर्घपात्रं संचाल्य॥ सव्येन कुशादिसहितं दक्षिणाद्र
व्यमादाय॥ अद्येह ······ गोत्रस्य ······ प्रेतस्य अस्थिसंचयनश्रा
द्धप्रतिष्ठार्थं इमां दक्षिणां रजतं चन्द्रदैवतं तन्निष्क्रयद्रव्यं वा
यथानामगोत्राय यथानाम शर्मणे ब्राह्मणाय दक्षिणां दा
तुमहमुत्सृजे॥ इति दक्षिणां दद्यात्॥ अपसव्यं कृत्वा दीप
माच्छाद्य॥ सव्यं कृत्वा हस्तौ पादौ प्रक्षाल्य॥ इति पठेत्॥ प्र
मादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च॥ स्मरणादेव तद्विष्णोः
संपूर्णं स्यादिति श्रुतिः॥ इति पठित्वा विष्णुं स्मरेत्॥ श्राद्धीयव
स्तु ब्राह्मणाय प्रतिपादयेत्॥ जले वा क्षिपेत्॥ इति अस्थि
सञ्चयनविधिः॥ ॥ ॥

अथ पाथेयश्राद्धप्रयोगः॥ कर्त्ता स्नानं विधाय श्राद्धभूमिं
शर्षपैः तिलैश्चावकीर्य॥ रक्षादीपं संस्थाप्य श्राद्धदेयानि वस्तू
न्यासाद्य आचम्य पूर्वाभिमुख उपविश्य अपवित्रः पवित्रो वा
सर्वावस्थां गतोऽपि वा॥ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः
शुचिः॥ इति पठित्वा पुण्डरीकाक्षः पुनातु॥ इति श्राद्धीयं द्रव्या

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

णि कुशजलेन सिंचेत्॥ ततः कुशतिलजलान्यादाय॥ अद्येत्यादि
देशकालौ स्मृत्वा ...... गोत्रस्य ...... प्रेतस्य मनुष्यलोकात्प्रेत
लोकगमनार्थं पाथेयश्राद्धमेकोद्दिष्टविधिनाहं करिष्ये इति सं
कल्पं कुर्यात्॥ ततो देवताभ्य इति त्रिः पठेत्॥ ततोऽपसव्येन दक्षि
णाभिमुखः पातितवामजानुः कुशादिकमादाय॥ अद्येह ...... गो
त्रस्य ...... प्रेतस्य इदमासनं ते मया दीयते तवोपतिष्ठताम्॥ इति
कुशरूपमासनं उत्सृजेत्॥ ततः द्वे के प्रादेशमात्रकुशपत्रद्व
यात्मकं पवित्रं॥ ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुना
म्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ इति मंत्रेण दक्षिणा
ग्रं पवित्रं धृत्वा॥ ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये
॥ शंय्योरभिस्रवन्तु नः॥ इति मंत्रेण जलम्॥ तिलोसि सोमदैवत्यो
गोसवो देवनिर्मितः॥ प्रत्नमद्भिः पृक्तः स्वधया पितॄंल्लोका
न्पृणाहि नः स्वाहा॥ इति तिलान्॥ गंधद्वारां दुराधर्षां नित्य
पुष्टां करीषिणीम्॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ इति
गंधम्॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्वि
नौ व्यात्तम्॥ इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण॥
इति पुष्पाणि क्षिपेत्॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा॥ पवित्रं
सपुष्पं अर्घपात्रोपरि नमो नारायणायेति मंत्रेण॥ उत्तराग्रं धृ
त्वा॥ ॐ या दिव्या आपः पयसा संबभूवुर्या आन्तरिक्षा उत पार्थि
वीर्या॥ हिरण्यवर्णा यज्ञियास्तान आपः शिवाः शं स्योनाः सुहवा
भवन्तु॥ इति अर्घपात्रस्थजलमभिमंत्र्य॥ कुशादीन्यादाय॥ अ
द्येह ...... गोत्र ...... प्रेत पाथेयश्राद्धे एष हस्तार्घस्ते मया दी
यते तवोपतिष्ठताम्॥ इति पवित्रोपरि अर्घजलं दद्युत्सृजेत्॥

ततः पवित्रसहितमर्घपात्रमासनस्य वामपार्श्वे प्रेताय स्थानम
सीति उत्तानमेवस्थापयेत्॥ ततो गन्धादिभिरभ्यर्च्य॥ कुशादि
कमादाय॥ अद्येह .... गोत्र .... प्रेत एतानि गन्धपुष्पाक्ष
तधूपदीपनैवेद्यपूगीफलवासांसि ते मया दीयन्ते तवोपति
ष्ठताम्॥ इति गन्धादिकमुत्सृजेत्॥ ततः चतुष्कोणं मण्डलं विधा
य॥ श्राद्धीयान्नाग्रभागं घृततिलजलयुतमन्नमादाय॥ इदमन्नमु
पनीय पात्रालम्भनावगाहनं विना॥ पृथिवी ते पात्रं द्यौरपिधानं
ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा॥ इदं विष्णुर्विचक्र
मे त्रेधा निदधे पदम्॥ समूढमस्य पांशुरे स्वाहा॥ इति पठित्वा
अपहता असुरा रक्षांसि वेदिषदः॥ इति तिलानन्नोपरि क्षिप्त्वा
॥ कुशादीकमादाय॥ अद्येह .... गोत्राय .... प्रेताय पाथेय
श्राद्धे इदमामान्नं सोपस्कराणं ते मया दीयते तवोपतिष्ठताम्॥
इत्युत्सृजेत्॥ सव्येन॥ ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्ध
वः॥ माध्वीर्नः सन्त्वोषधीः॥ मधु नक्तमुतोषसो मधुमत्पार्थिव
ं रजः॥ मधु द्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमाँऽ अ
स्तु सूर्यः॥ माध्वीर्गावो भवन्तु नः॥ मधु मधु इति च पठेत्॥ अन्नही
नं क्रियाहीनं विधिहीनं च यद्भवेत्॥ तत्सर्वमच्छिद्रमस्तु भास्क
रस्य प्रसादतः॥ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे॥ नमः
पिनाकहस्ताय वज्रहस्ताय वै नमः॥ इति श्लोकं च पठेत्॥ अ
त्र विकरनिषेधः॥ ततोऽपसव्येनान्नपात्रसमीपे पिण्डदाना

Funding: MIDF

र्थं मृत्पिण्डिकां विधाय ॥ ततो रेखोल्मुकभ्रामणानि विना छिन्न
मूलकुशानास्तीर्य ॥ कुशादीन्मादाय ॥ अद्येह ...... गोत्र ...... प्रे
तपाथेयश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपति
ष्ठताम् ॥ इत्यास्तृतकुशोपरि अवनेजनं दद्यात् ॥ ततो मधुघृतति
लयुक्तेनान्नेन पिण्डं निर्माय ॥ जलतिलकुशसहितपिण्डमादा
य ॥ अद्येह ...... गोत्र ...... प्रेतपाथेयश्राद्धे एष पिण्डस्ते मया दीयते
तवोपतिष्ठताम् ॥ इत्यवनेजनस्थानोपरि पिण्डं दद्यात् ॥ ततः आस्तृ
तकुशमूलेन करं प्रोक्ष्य ॥ पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ॥ सव्यं
कृत्वाऽऽचम्य ॥ अपसव्यं कृत्वा तूष्णीं प्रेतं भास्करमूर्तिं ध्यायेत् ॥
ततः कुशादीन्मादाय ॥ अद्येह ...... गोत्र ...... प्रेत इदं पिण्डप्रत्यवने
जनं ते मया दीयते तवोपतिष्ठताम् ॥ इति प्रत्यवनेजनं पिण्डोपरि दद्या
त् ॥ ततो नीवीं विस्रस्य ॥ सव्यं कृत्वा आचम्य ॥ अपसव्यं कृत्वा ॥ वा
महस्तेन सूत्रमादाय ॥ कराभ्यां गृहीत्वा प्रेतैतत्ते वासः ॥ इति सूत्रं
पिण्डोपरि धृत्वा ॥ गंधपुष्पादिना पिण्डं सम्पूज्य ॥ कुशादीन्मा
दाय ॥ अद्येह ...... गोत्र ...... प्रेत पाथेयश्राद्धे पिण्डे एतानि सूत्रग
न्धपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ताम् ॥
✓इति गन्धादिकमुत्सृजेत् ॥ ततः शिवा आपः सन्तु इति जलम् ॥ सौम
नस्यमस्तु इति पुष्पम् ॥ अक्षतं चारिष्टमस्तु इति तण्डुलान् ॥ अन्नपा
त्रोपरि निक्षिपेत् ॥ ततः कुशादीन्मादाय ॥ अद्येह ...... गोत्रस्य ......
प्रेतस्य पाथेयश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठताम् ॥ इत्यक्षय्योद
कं दत्वा ॥ सव्यं कृत्वा दक्षिणां दिशं पश्यन् अघोरः प्रेतोऽस्तु ॥ इति पू
र्वाग्रां जलधारां दत्वा ॥ ततोऽपसव्यं कृत्वा सपवित्रकुशान् पिण्डो
परि क्षिपेत् ॥ अग्नौ दहेत् ॥ ततोऽर्घपात्रं संचाल्य ॥ सव्येन कुशानि

सहितदक्षिणाद्रव्यमादाय॥अद्येह ...... गोत्रस्य ...... प्रेतस्यमत
र्यलोकात्प्रेतलोकगमनार्थकपाथेयश्राद्धप्रतिष्ठासांगतासिध्य
र्थं दक्षिणां रजतं चन्द्रदैवतं तन्निष्क्रयं द्रव्यं ताम्रं सूर्य दैवतं यथा
नाम गोत्राय यथानाम शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥
इति दक्षिणां दद्यात्॥ अपसव्यं कृत्वा दीपमाछाद्य॥ सव्येन ह
स्तौ पादौ प्रक्षाल्याचम्य॥ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्व
रेषु च॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥ विष्णुं
स्मरेत्॥ श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत्॥ जले वा क्षि
पेत्॥ इति पाथेय श्राद्धं सम्पूर्णं शुभम् . . . .

श्रीगणेशाय नमः ॥ अथैकादशाहे क्रियाक्रमः ॥ अथ प्रातर्नदीजलाश
याऽन्यतरं वा गत्वा ॥ पात्रब्राह्मणस्य श्मश्रुकर्मनखच्छेदनं च कारयित्वा
ताम्रपात्रेणाश्वानोपकरणं तैलोद्वर्तनं च दत्त्वा · स्वयं च स्नात्वा श्वेतव
स्त्रं परिधाय ॥ जलाशयसमीपे गृहे वा श्राद्धभूमिं परिकल्प्य तां संशोध्य
गोमयेनोपलिप्य गोरजिकयाऽच्छाद्य पञ्चगव्येनाऽभ्युक्ष्य तिलैः शर्ष
पैश्च विकिरेत् ॥ आग्नेय पाकस्थाने तिलान्विकीर्य · तत्र सपिण्डद्वारेणानू
तन मृन्मय भाण्डे ताम्रपात्रादौ वा पाकं कारयितुमारभ्योदङ्मुखाय
ब्राह्मणाय शय्यां दद्यात् ॥ तत्र क्रमः ॥ कर्ता आचान्तः पूर्वाभिमुखः ॥
सव्येन सोपकरणशय्यायै नमः ॥ ब्राह्मणाय नमः ॥ इति देयब्राह्मणो
त्रिः सम्पूज्य वारिणा शय्यामभिषिञ्च्य ॥ कुशतिलजलान्यादाय ॥ अ
द्येहाऽशौचान्तद्वितीयेह्नि अमुकगोत्रस्याऽ...... प्रेतस्य स्वर्गप्राप्ति
काम इमां सोपस्करणशय्यां विष्णुदैवतां अमुकगोत्रायाऽमुकश
र्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ ततः प्रार्थना ॥ यस्माद्शून्यं शयनं
केशवस्य शिवस्य च ॥ शय्या अस्याप्यशून्यास्तु तस्माज्जन्म निजन्म
नि ॥ इत्युच्चार्य दद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ कुशतिलजलदक्षिणा
द्रव्याण्यादाय ॥ अद्य कृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थं इदं हि
रण्यमग्निदैवतं अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सं
प्रददे ॥ इति दक्षिणां दद्यात् ॥ ततः प्रतिग्रहीता स्वस्तीत्युक्त्वा शय्यां
स्पृशेत् ॥ अथ काञ्चनपुरुषदानम् ॥ तत आचम्य ॥ फलवस्त्रसम
ब्राह्मणाय नमः
न्वित काञ्चनपुरुषाय नमः ॥ इति देयब्राह्मणो त्रिः सम्पूज्य ॥ वारि
णा देयवस्तु मभ्युक्ष्य ॥ कुशादीन्यादाय ॥ अद्याऽशौचान्त द्वितीये
ह्यमुकगोत्रस्याऽमुकप्रेतस्य स्वर्गप्राप्तिकाम इमं फलवस्त्रसम
न्वितं काञ्चनपुरुषं विष्णुदैवतं अमुकगोत्रायाऽमुकशर्मणे ब्रा

लणायतुभ्यमहं संप्रददे ॥ स्वस्तीत्युक्त्वा ॥ ततो दक्षिणादिकमा
दाय ॥ अद्य कृतैतत्फलवस्त्रसमन्वितकाञ्चनपुरुषदानप्रतिष्ठा
र्थमिमं सुवर्णमग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणा
य तुभ्यमहं संप्रददे ॥ इति दक्षिणां दद्यात् ॥ प्रतिग्रहीता स्वस्तीत्यु
क्त्वा काञ्चनपुरुषं स्पर्शयेत् ॥ अथ द्विजदम्पतीपूजनम् ॥ तत्राच
म्य ॥ कुशतिलजलान्यादाय ॥ अद्याऽशौचान्त द्वितीयेऽह्नि अमुकगो
त्रस्याऽमुकप्रेतस्य स्वर्गप्राप्तिकाम इमौ द्विजदंपती अहं पूजयिष्ये
॥ इति सङ्कल्प ॥ द्विजदम्पती पूजेत् ॥ तत्र क्रमः ॥ एषोऽर्घो द्विजदम्पती
भ्यां नमः ॥ इदमनुलेपनम् इदं सिन्दूरम् इमानि पुष्पाऽक्षतधूप
दीपनैवेद्यवस्त्रोपायनानि द्विजदम्पतीभ्यां नमः ॥ इति दद्यात् ॥ ततो
✓ नमस्कुर्याच्च ॥ प्रतिमापूजनपक्षे पूजयित्वा ब्राह्मणाय दद्यात् ॥
इति दद्यात् ॥ ततो नमस्कुर्याच्च ॥ प्रतिमापूजनपक्षे पूजयित्वा ब्राह्म
णाय दद्यात् ॥ अद्याऽशौचान्त द्वितीयेऽह्नि अमुकगोत्रस्य ...... प्रे
तस्य स्वर्गप्राप्तिकाम इमौ द्विजदम्पती विष्णुदैवतौ ...... गोत्राय
...... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ स्वस्तीति प्रतिवचनम्
॥ ततो दक्षिणादिकमादाय ॥ अद्य कृतैतद्द्विजदम्पतीदानप्रति
ष्ठार्थं इदं हिरण्यमग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणा
येत्यादि ॥ प्रतिग्रहीता स्वस्तीत्युक्त्वा द्विजदम्पतीं स्पर्शयेत् ॥ अ
थ वृषोत्सर्गः ॥ एकादशेऽह्नि प्रेतस्य यस्य नोत्सृज्यते वृषः ॥ पिशा
चत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥ १ ॥ यमुद्दिश्योत्सृजन्नीलं स लभे
त परं गतिम् ॥ वृषोत्सर्गः पुनात्येव दशातीतान्दशाऽपरान् ॥ इति
देवीपुराणभविष्यादौ फलश्रुतेश्च ॥ अथ प्रयोगः ॥ वृषोत्सर्गसंप्र
भृतिं प्राक्प्रवणं देशं नीत्वा ॥ आचान्तः पूर्वाऽभिमुख उपविश्य सव्ये
न ॥ कुशतिलजलान्यादाय ॥ अद्याऽशौचान्त द्वितीयेऽह्नि अमुकगो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

त्रस्याऽमुकप्रेतस्य प्रेतत्वविमुक्तिस्वर्गलोकगमनार्थं वत्सतरीस
हितं वृषोत्सर्गमहं करिष्ये ॥ इति संकल्पं कुर्यात् ॥ [illegible]
[illegible]
[illegible]
[illegible] ॥ अथ ब्राह्मणवरणम् ॥ ततः
उत्तराऽभिमुखं ब्राह्मणमुपवेश्य ॥ अद्याऽमुकगोत्रस्याऽमुकप्रेत
स्याऽद्य कर्तव्य वृषोत्सर्गाङ्गभूत होमकर्मणि कृताकृतावेक्षणरू
प ब्रह्मकर्म कर्तुं ममुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्गन्धपू
गीफलवस्त्राऽक्षतवासोभिर्ब्रह्मत्वेन त्वामहं वृणे ॥ इति ब्रह्माणं वृ
णुयात् ॥ वृतोऽस्मीति प्रतिवचनम् ॥ यथाविहितं कर्म कुरु ॥ कर
वाणीति प्रतिवचनम् ॥ ततः होतारम् ॥ कुशादिकमादाय ॥ अद्याऽमु
कगोत्रस्याऽमुकप्रेतस्याद्य कर्तव्य वृषोत्सर्गाङ्गभूत होमकर्मकर्तुं
ममुकगोत्रममुकशर्माणं मेभिर्गन्धपूगीफलवस्त्राऽक्षतवासोभि
र्होतृत्वेन त्वामहं वृणे ॥ इति होतारं वृणुयात् ॥ वृतोऽस्मीति प्रतिव
चनम् ॥ यथाविहितं कर्म कुरु ॥ करवाणीति प्रतिवचनम् ॥ होतृब्राह्मणा
भावे स्वयमेव सर्वं कुर्यात् ॥ क्षत्रियादिस्तु ब्राह्मणद्वारा कारयेत् ॥ ततो
होता आचान्तः प्राङ्मुख उपविश्य गोमयेनोपलिप्य मध्ये प्रादेश
मात्रमुत्तरोत्तरक्रमेण स्रुवमूलेन त्रिरुल्लिख्य उल्लेखनक्रमेण दक्षिण
हस्ताऽनामिकाङ्गुष्ठाभ्यां संगताभ्यां उद्धृत्य ॥ स्पृशन्यांन्निक्षिप्य तं देशं
जलेनाभ्युक्ष्य ॥ तत्र दक्षिणहस्तस्थकांस्यपात्रेण तूष्णीमग्निं स्थापये
त् ॥ अग्नेर्दक्षिणतः परिस्तरणं भूमिमनतिक्रम्य ब्रह्मासनमुपकल्प्य ॥
तत्र प्रागग्रकुशैः स्तरणं विधाय ॥ ब्रह्माणमग्रेर्वा यथान्यत्र दक्षिणमा
नीय ॥ कल्पितासने वर्हिर्हस्तमुपवेशयेत् ॥ ततोऽग्नेरुत्तरतः स्तरणभूमि
मनतिक्रम्य कुशत्रयमास्तीर्य ॥ तत्र मृन्पात्रं वज्रमसमासेनं धृत्वा उदक
क्षीरं च ब्रह्मणो मुखमवलोक्य निदध्यात् ॥ तत्र उपमूलसकल्लून वर्हि

र्षोमुष्टिचतुर्थभागेन आग्नेयादीशानान्तम्॥ ब्रह्मणोऽग्निपर्यन्त
म्॥ नैरृत्याद्वायव्यान्तम्॥ अग्नितः प्रणीतापर्यन्तम्॥ इति परिस्ती
र्य॥ ततोऽग्नेरुत्तरतः प्रणीतापश्चिमे प्राक्संस्थं वा उपयोक्ष्यमाण
नामासादनम्॥ तद्यथा॥ पवित्रछेदनार्थं कुशपत्रत्रयम्॥ पवित्रार्थ
मनन्तर्गर्भिणं साग्रं कुशपत्रद्वयम्॥ प्रोक्षणपात्रम्॥ आ
ज्यार्थं ताम्रस्थाली· पायसचर्वर्थं मृत्तिकास्थाली· श्रुवसम्मार्ज्जना
र्थं कुशपत्रत्रयम्॥ उपयमनार्थं वेणीरूप कुशत्रयम्· प्रादेशप्रमाणं
पलाशसमिधत्रयम्· श्रुव आज्यम्॥ तण्डुलाः दुग्धम्· एवमासाद्य
तदुत्तरतः सिद्धमेव पैष्ट्यं पिष्टमयं चरुम्॥ ब्रह्मदक्षिणार्थं पूर्णपा
त्रम्· होतृदक्षिणार्थं वस्त्रयुगलसुवर्णं कांस्यानुपकल्पयेत्॥ तत
आसादितकुशपत्रद्वयमादाय· पविछेदनकुशैः प्रादेशमात्रं समा
यछित्वा॥ तानपास्य पवित्रे प्रणीतोदकं च प्रोक्षण्यां निधाय॥
उदगग्रपवित्रे व्यस्तहस्तयोरङ्गुष्ठाऽनामिकाभ्यां मन्तरपोए
दाय· तन्मध्येन प्रोक्षण्युदकं त्रिः क्षिपूत्वा पवित्रे प्रोक्षण्यां नि
धाय तत्पात्रं दक्षिणहस्तेनाऽऽदाय॥ वामेन दक्षिणहस्ताङ्गुष्ठा
ऽनामिकाभ्यां तज्जलं किञ्चिदूर्द्ध्वमुत्क्षिप्य॥ प्रणीताजलेन प्रोक्ष
णीमभिषिच्य॥ तज्जलेन यथासादितं द्रव्यं प्रत्येकं सकृत्प्रोक्ष्य॥ प
वित्रशेषजलसहितं पात्रं प्रणीताग्न्युत्तरे निधाय· आज्यस्थाल्यां प्रो
क्षण्युदकं प्रक्षिप्य· एकत्र प्रदेशे रुद्रहोमार्थं दुग्धं निक्षिप्य· प्रणी
तोदकेन त्रिः प्रक्ष्यालित तण्डुलाः चरुस्थाल्यां निःक्षिपेत्॥ स्वयं चरु
ब्रह्मणा चाऽऽज्यं गृहीत्वा प्रदक्षिणीकृत्याऽग्निपूर्वेणानीत्वा॥ दक्षि
णत आज्यम्· उत्तरतः पायसचरु श्रपणार्थं युगपदग्नौ निधाय॥
ज्वलत्तृणमादायाऽऽज्यचर्वोरुपरि दक्षिणं भ्रामयित्वाऽग्नौ क्षिपे
त्॥ श्रुवस्य प्रागग्रस्याऽवाङ्मुखस्याऽग्नौ प्रतपनम्॥ सम्मार्ज

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDP

नकुशैः सम्मार्जनम्॥ प्रणीतोदकेन स्रुवः प्रोक्षणम्· पुनः प्रतप
नम्॥ आस्तीर्णबर्हिषि खरपरतः प्रागग्रस्थापनं विधाय॥ पाकेरजेस्थ
य माज्यमुद्वास्या ऽग्नि पश्चिमेन नीत्वा· प्रणीतोत्तरतः प्रथमं निधा
य॥ चरुं तथैवोद्वास्या ऽग्नेः पश्चिमेन नीत्वा आज्योत्तरतो निदध्या
त्॥ प्रोक्षिणीतः पवित्रे समानीया ऽज्ये प्रोक्षणमुत्पवनं विधाय॥ पा
यस चरोरुत्तरतः पूर्वसिद्ध पिष्ट चरुं निधाय॥ होमसमाप्तिपर्यन्तम् प
ग्रहार्थं कुशौ वा महत्से उपगह विधाय॥ प्रजापतिं चिन्तयन्तूष्णीमु
रुप्रागग्रघृताक्त समित्त्रयं प्रक्षिप्योपविश्य पवित्रे गृहीत्वा॥ प्रो
क्षणी जले नाग्निं पर्युक्ष्य· पवित्रं प्रणीता पात्रे निधाय॥ प्रोक्षणी
पात्रं स्वस्थाने निदध्यात्· अथ दक्षिणजानु आजुहोति स्थाने उ
पविष्टः॥ प्राङ्मुखोन्वारब्धः॥ स्रुवेण यजाज्याहुतिः॥ नोकुर्याद्
ममंत्राणां पृथगादिष्ट कुत्रचित्॥ अन्येषां चावरुष्टानां कार्यमा
चमनादिना॥ इति परिशिष्ट वचनात्॥ ओंकाररहिताः॥ यजाज्या
हुतिर्दद्यात्॥ तद्यथा॥ ब्रह्मणा ऽन्वारब्धः स्रुवं गृहीत्वा दक्षि
णजानुं नमयित्वा॥ इह रतिः स्वाहा॥ इदमग्नये॥ इह रमध्वं॰ स्वा
हा॥ इदमग्नये॥ इह धृतिः स्वाहा॥ इदमग्नये॥ इह स्वधृतिः स्वाहा
इदमग्नये ४॥ रायस्पोषमस्मासु दीधरत् स्वाहा॥ इदमग्नये ६॥
ततो ब्रह्मणान्वारब्धो जुहोति॥ अग्नेर्दक्षिणभागे मनसा॥ ॐ प्र
जापतये स्वाहा॥ इदं प्रजापतये॥ अग्नेरुत्तरभागे॥ ॐ इन्द्राय स्वाहा
इदमिन्द्राय॥ ततउत्तरार्द्धे॥ ॐ अग्नये स्वाहा॥ इदमग्नये॥ दक्षिण
पूर्वार्द्धे॥ ॐ सोमाय स्वाहा॥ इदं सोमाय॥ इत्याघारावाज्यभागौ सं सर्वं हुत्वा समिद्धृतमेतौ
संस्रवं नैव पायसेन॥ नवाहुतयो दातव्या॥ तद्यथा॥ ॐ अग्नये स्वाहा
॥ इदमग्नये॥ ॐ रुद्राय स्वाहा॥ इदं रुद्राय॥ ॐ शर्वाय स्वाहा॥ इद

७ उपसृजन्धरुणं मात्रे धरुणो मातरं धयन्स्वाहा॥ इदमग्नये॥ ५॥

शर्वाय ॥ ॐ पशुपतये स्वाहा ॥ इदं पशुपतये ॥ ॐ उग्राय स्वाहा ॥
इदमुग्राय ॥ ॐ अशनये स्वाहा ॥ इदमशनये ॥ ॐ भवाय स्वाहा ॥
इदं भवाय ॥ ॐ महादेवाय स्वाहा ॥ इदं महादेवाय ॥ ॐ ईशानाय
स्वाहा ॥ इदमीशानाय ॥ इति पायसेन हुत्वा ॥ पिष्टकेन जुहुयात् ॥
ॐ पूषा गान्वेतु नः पूषा रक्षत्वर्वतः पूषा वाजं सनोतु नः स्वाहा ॥ इ
दं पूष्णे ॥ ततः पायसपिष्टकाभ्याम् ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इद
मग्नये स्विष्टकृते ॥ तत आज्येनाऽग्नेर्मध्यभागे ॥ ॐ भूः स्वाहा ॥ इदमग्न
ये ॥ ॐ भुवः स्वाहा ॥ इदं वायवे ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय ॥ ॐ त्वन्नो अग्ने
वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शो
शुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्निवरुणा
भ्याम् ॥ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ
॥ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वा
हा ॥ इदमग्निवरुणाभ्याम् ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च
सत्यमित्वमया असि ॥ अया नो यज्ञं वहास्यया नो धेहि भेषजं
स्वाहा ॥ इदमग्नये ॥ ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा
वितता महान्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरु
तः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो
मरुद्भ्यः स्वर्केभ्यः ॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विम
ध्यमं श्रथाय ॥ अथा वयमादित्य व्रते तवानागसो अदितये स्या
म स्वाहा ॥ इदं वरुणाय ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥
इति मनसा ॥ एवं हुत्वा संस्रवप्राशनमाचमनं च कृत्वा ॥ पवि
त्राभ्यां शिरः सम्मार्जनम् ॥ सुमित्रिया न आप ओषधयः स
न्तु ॥ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ इ

ति मंत्रेण ऐशान्यां प्रणीताविमोकः॥ ततः फलपुष्पान्वितेनष्ट
तेन॥ मूर्द्धानन्दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्नि
म्॥ कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः
स्वाहा॥ इदमग्नये॥ इति यजमानसहितो होता पूर्णाहुतिंकुर्या
त्॥ ततः स्तरणक्रमेण वर्हिरुत्थाप्याज्येनाऽभिघार्य॥ ॐ देवा
गातुविदोगातुंवित्वागातुमित॥ मनसस्पतइमन्देवयज्ञꣳस्वाहा
वातेधाः॥ इदमग्नये॥ इति वर्हिर्होमंकुर्यात्॥ ततो यजमानः॥ कुश
तिलजलान्यादाय॥ अद्य कर्त्तव्य वृषोत्सर्गाङ्गभूत कृतैतद्धोमकर्म
णि कृताकृतावेक्षणरूप ब्रह्मकर्मप्रतिष्ठार्थं इदमपूर्णपूर्णार्थं
पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय
ब्रह्मणे दक्षिणान्तुभ्यमहं संप्रददे॥ इति ब्रह्मणे दक्षिणान्दद्यात्
॥ स्वस्तीति प्रतिवचनम्॥ ततो वस्त्रयुगं सुवर्णकांस्यपात्रमुपनीय॥
कुशादीन्यादाय॥ अद्य कर्त्तव्य वृषोत्सर्गाङ्गभूत कृतैतद्धोमकर्म
प्रतिष्ठार्थमेतानि वस्त्रयुगसुवर्णकांस्यपात्राणि बृहस्पति वह्निचन्द्र
दैवतानि अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय होत्रे दक्षिणा
न्तुभ्यमहं संप्रददे॥ स्वस्तीति प्रतिवचनम्॥ ततो द्विहायनमेकहाय
नंवा॥ जीववत्सायाः पयस्विन्याः पुत्रं नीलादिवर्णं वृषभं यथाला
भंवा आनीय॥ ततश्चतस्रो द्वैकांवा एकवर्षाऽधिकां वत्सतरीमा
नीय॥ अग्निसमीपे सुप्रक्षित गोपालेन प्राग्जीवं वृषभं संवेशये
त्॥ ततो रुद्राध्यायं पठन् वृषभसमीपं गत्वा मानस्तोके इति मंत्रेणा
ग्निमपाद॥ दक्षिणपार्श्वे कुङ्कुमलाक्षारसचन्दनादिना त्रिशूलंलि
खेत्॥ वृषोऽयसि भानुनाद्युमन्तं त्वा हवामहे पवमानः सहस्राम्

Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

इतिमंत्रेण पश्चिमपाद वाम पार्श्वे चक्रं लिखेत्॥ वृषभस्य॥ त
तो लोहकारमाहूय वृषभं अंकय इति ब्रुयात्॥ ततो वक्ष्यमाण
मंत्रैः स्नपयेत्॥ तत्रमंत्राः॥ हिरण्यवर्णाः शुचयः पावकायाः सु
जातः कश्यपायास्विन्द्रः या अग्निं गर्भं दधिरे सुवर्णा स्तानआ
पः सस्योना सुहवा भवन्तु॥ यासां राजा वरुणो याति मध्ये सत्या
नृते अव पश्यंजनानाम्॥ या अग्निं गर्भं दधिरे सुवर्णा स्तानआ
पः सस्योना सुहवा भवन्तु॥ यासां देवा दिवि रावन्ति भक्ष्यं या अ
न्तरिक्षे वहुधा भवन्ति॥ या अग्निं गर्भं दधिरे सुवर्णा स्तानआ
पः संस्योना सुहवा भवन्तु॥ शिवेन मा चक्षुषा पश्यतापः शिवा
यतन्वो पस्पृशत्त्वचम्मे घृतश्चुतः शुचयोयाः पावकास्तानआ
पः सस्योना सुहवा भवन्तु॥ शन्नोदेवीरभिष्टय आपो भवन्तु पी
तये॥ शंयोरभिश्रवन्तु नः॥ इति ततो लोहघण्टि नूपुर कनकप
ट्टिका श्वेतवस्त्रादिभिर्वत्सतरीतं वृषभमलंकृत्य॥ सावित्री
मघमर्षणं रुद्राध्यायं पुरुषसूक्तं यद्देवा देवहेडनमित्यादिकं
कत्तर्यं कूष्माण्डीं श्च जपेत्॥ ततो वृषभस्य दक्षिणकर्णे पिता
वत्सानां पतिरघ्न्यानामथो पितामहो गिरीणां गणं वत्सो जरायुः
प्रतिधुक्पीयूष आमिक्षा घृतं तद्वस्य रेतः॥ वृषो हि भगवान्
धर्मश्चतुःपादः प्रकीर्तितः॥ वृणोमि तमहं भक्त्या स मां रक्षतु
सर्वतः॥ इतिमंत्रद्वयं पठित्वा वत्सतरीसहितं वृषभं पूजयेत्॥
सवोऽर्घो वत्सतरीसहितवृषभाय नमः॥ इदमनुलेपनं वत्सतरीसहि
त वृषभाय नमः॥ पुष्पम् मालां धूपम् दीपम् नैवेद्यम् इति पू
जयेत्॥ ततः कुशतिलजलान्यादाय॥ सव्येन॥ अद्याऽशौचान्त
द्वितीयेह्नि अमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्त्वविमुक्तिपूर्वका

Nepal Sanskrit University, Balmiki C

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

ऽक्षय्यस्वर्गकामो रुद्रदैवत्यमेनं पतिं वो ददामि तेन क्रीडन्तीश्च
रथ प्रियेण मानः साप्रजनुया सुभगा रायस्पोषेण समिद्याम
देम ॥ इत्युत्सृजेत् ॥ नीलवृषे नीलपट प्रक्षेपः ॥ ततः ऐशान्यां दि
शं वत्सतरी सहितं वृषभं चालयेत् ॥ वत्सतरी मध्यगतं वृषभम
भिमन्त्रयेत् ॥ तत्र मन्त्राः ॥ यमो भूरभिमावाहि स्वाहा ॥ मारुतोसि
मरुतां गणः शम्भूर्मयोभूरभिमाँहि स्वाहा ॥ वसूरसि रुद्रवस्त्वान्छ
म्भूरभिमावाहि स्वाहा ॥ यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति र
श्मिभिः ॥ ताभिर्नो अद्य सर्वाभिरुचे जनाय नस्कृधिः ॥२॥ यावो
देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ॥ इन्द्राग्नी ताभिः सर्वाभी रुचन्नो
धत्त बृहस्पते ॥३॥ रुचन्नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि
॥ रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥४॥ तन्त्वा यामि ब्रह्म
णा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणे
ह बोध्युरुशंस मा न आयुः प्रमोषीः ॥५॥ स्वर्ण घर्मः स्वाहा स्व
र्णार्कः स्वाहा· स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्णसूर्यः स्वा
हा ॥ ततः कृता ऽपसव्यो दक्षिणाऽभिमुखो वामजानुम्पातयित्वा
वृषभपुच्छे तिलजलकुशान्यादाय ॥ ताम्रपात्रस्थजलेन मन्त्रस्थ
फलमुद्दिश्याऽञ्जलित्रयेण तर्पयेदेभिर्मन्त्रैः ॥ स्वधा पितृभ्यो मातृ
भ्यो बन्धुभ्यश्चापि तृप्तये ॥ मातृपक्षाश्च ये केचिद्ये चान्ये पितृप
क्षजाः ॥ गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ॥ ये प्रेतभावमापन्ना
ये चान्ये श्राद्धवर्जिताः ॥ वृषोत्सर्गेण ते सर्वे लभन्तां तृप्तिमुत्तमाम्
॥ इति ततो लोहकारमाहूय अग्निमन्तं वेतनं तस्मै दद्यात् ॥ उत्सृष्ट

ब्राह्मणान् श्रावयेत्॥ यत्किंचिद्विजनामयोऽस्तु त्वं तदन्येन न नेयं तन
वाह्यं न च क्षीरं पातव्यं केन चित्क्वचित्॥ इति। ततो रुद्रप्रेव हु सर्पिष्कं
पायसं ब्राह्मणान् भोजयेत्॥ इति वृषोत्सर्गः॥ अथ कपिलादानम्
॥ कपिलासमीपं गत्वा॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ इति मन्त्रेण कपिलां पुष्पचन्द
नाऽक्षतधूपदीपनैवेद्यवस्त्रापायनादिभिः सम्पूज्य॥ ब्राह्मणं च सं
म्पूज्य॥ कुशजलेन गामभ्युक्ष्य॥ कुशादीन्यादाय॥ अद्याऽमुगोत्राम
द्वितीयेऽह्नि अमुकप्रेतस्य स्वर्गप्राप्तिकामः इमां कपिलां गां सवत्सां हे
मशृङ्गीं रौप्यखुरां कांस्यदोहां ताम्रपृष्ठीं वस्त्रयुगच्छन्नां मुक्तालाङ्गु
लभूषितां रुद्रदैवतां अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यम
हं संप्रददे॥ ततः प्रार्थना॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी॥
तीर्थदेवमयी यस्मात् अतः शान्तिं प्रयच्छ मे॥ ततो दक्षिणाद्रव्याणि पाद
य॥ अद्य कृतैतत्सोपकरणसवत्सकपिलादानप्रतिष्ठार्थमिदं हिरण्य
मग्निदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे
॥ इति दक्षिणां दद्यात्॥ ततः प्रतिग्रहीता॥ को दात् कस्मा अदात् कामो दा
त्कामायादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते॥ इति कामस्तुतिं
गोपुच्छग्रहणं च कुर्यात्॥ ततः कृताऽपसव्यो दक्षिणाऽभिमुखो वामजा
नुं पातयित्वा॥ गोपुच्छतिलकुशान्यादाय॥ ताम्रपात्रस्थजलेन मैत्रस्थ
फलसुदिशपाऽञ्जलित्रयेण तर्पयेदेभिर्मन्त्रैः॥ स्वधा पितृभ्यो मातृभ्यो
बन्धुभ्यश्चापि तृप्तये॥ मातृपक्ष्याश्च ये केचिद्ये चान्ये पितृपक्षजाः॥
गुरुश्वसुरबन्धूनां ये कुलेषु समुद्भवाः॥ ये प्रेतभावमापन्ना ये चान्ये श्रा

द्रुवर्जिताः॥कपिलादानपुण्येनलभतांतृप्तिमुत्तमाम्॥इतियथो
क्तकपिलाभावेकेवलामपिदद्यात्॥ततःसचैलंस्नायात्॥ ॥
अथैकादशाहे आद्यमासिकश्राद्धप्रयोगः॥ततःकर्तास्नानंवि
धायगोमयोपलिप्तायांभूमौ नमइतित्रिःपुष्पाक्षतपूजितायां
भूमौदर्भेषुतिष्ठन्॥यजमानसवर्णेनाहूतंब्राह्मणंस्नानमा
चान्तंस्वागतमितिपृच्छेत्॥सुस्वागतमितितेनोक्तेउभावुपविशे
तः॥ततःश्राद्धकर्ताऽपसव्येनपुष्पचंदनपूगीफलानिब्राह्मणा
यदत्त्वाब्राह्मणस्यदक्षिणजानुस्पृष्ट्वा॥अद्याऽमुकगोत्रस्याऽ
मुकप्रेतस्यआद्यमासिकश्राद्धकरणायभवन्तंब्राह्मणमहमा
मन्त्रये॥आमन्त्रितोस्मीतिप्रतिवचनम्॥अक्रोधनेनशौचपरेण
सततंब्रह्मवादिना॥भवितव्यंभवताचमयाचश्राद्धकारिणा॥
सर्वायासविनिर्मुक्तेनकामक्रोधविवर्जितेन॥भवितव्यम्भवता
नोद्यतनेश्राद्धकर्मणि॥इतिपात्रंब्राह्मणंनियमनंश्रावयेत्॥भ
वितव्यम्॥इतितेनोक्ते॥अर्घ्यंसंपाद्यवामहस्तेकृत्वागन्धपुष्पा
भ्यामभ्यर्च्य॥कुशादिकमादाय॥अद्याऽमुकगोत्राऽमुकप्रे
तआद्यमासिकश्राद्धेएषपाद्यार्घ्यस्तेमयादीयतेतवोपतिष्ठता
म्॥इतिपाद्यार्घ्यंदद्यात्॥ततस्तिलतैलेनविप्रपादौआजानुअ
भ्यञ्जयेत्॥ततःसव्येनस्वयमाचम्यअपसव्येन॥पात्रब्राह्मण
मप्याचम्यअग्रेकृत्वा॥श्राद्धदेशमागत्योपविश्यपाऽत्राभिप्रा
येणसिद्धमितिपृच्छेत्॥ततोदक्षिणाग्रैककुशसहितनेपालक
वलाद्यासनकमासनमुपकल्पआसनेस्पृशन्॥अत्रासनेदेवरा
जाभ्यनुज्ञातोविश्रम्यतांद्विजवर्याउपहात्॥प्रसादपेत्यासनम्

गृह्ण पूतपात्राणि।ऽग्निपूतेन करणेन विप्रः ॥ इति मंत्रं पठित्वा पात्रब्रा
ह्मणं दक्षिणहस्ते धृत्वा उदङ्मुखमुपवेशयेत् ॥ ततः पात्रब्राह्म
णस्य पादयोस्थजले दक्षिणा कुशत्रयं दद्यात् ॥ आसनसमी
पे तिलतैलेन घृतेन वा श्राद्धसमाप्तिपर्य्यन्तं स्थापितं दीपं
दद्यात् ॥ तद्रक्षा च पात्रब्राह्मणेन कार्य्या ॥ रक्षोघ्नान् गौरसर्षपा
न् तिलांश्च श्राद्धदेशे विकिरेत् ॥ अथ जलपूर्णपात्रदानम् ॥ स
व्येन ॥ आचम्य जलपूर्णपात्राय नमः ॥ ब्राह्मणाय नमः ॥ इति दे
य ब्राह्मणो त्रिः संपूज्य वारिणा देयवस्तु अभ्युक्ष्य ॥ कुशादिक
मादाय ॥ अद्याऽशौचान्त द्वितीयेऽह्नि अमुक गोत्रस्याऽमुक
प्रेतस्य प्रेतत्व विमुक्त्युत्तमलोक प्राप्तिपूर्वक वहुरसोपस्थिति
विषयदधिकरणक पूज्यत्व काम इदं जलपूर्णपात्रं प्रजापति
दैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रद
दे ॥ प्रतिगृह्णामि स्वस्तीति प्रतिवचनम् ॥ ततो दक्षिणाद्रव्यमा
दाय ॥ अद्य कृतैतज्जलपूर्णपात्रदानप्रतिष्ठार्थमिदं हिरण्यम
ग्निदैवतममुकगोत्रायेत्यादि ॥ कोदात् इति कामस्तुतिं पठेत् ॥
अथ आपाकदानम् ॥ तत आचम्य गन्धादिना देयब्राह्मणो त्रिः
संपूज्य ॥ वारिणा देयवस्त्वभ्युक्ष्य ॥ कुशतिलजलान्यादाय
॥ अद्याऽशौचान्त द्वितीयेऽह्नि अमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्व
विमुक्त्युत्तमलोकप्राप्तिपूर्वकसौभाग्याऽवैधव्यसर्वतृप्त्येनम्
न्यमित्रजनयुतगृहसदाभर्त्रा वियोगसमुखानुत्तम इदमापाकं
नानाभाण्डनिर्म्मितं यथोपलब्धस्वहेमताम्राद्युपरि विष्णुदैवतम

यथानामगोत्रायेत्यादि ॥ स्वस्तीति प्रतिवचनम् ॥ आपाकब्रह्मरू
पोसि भाण्डनामा निजनव ॥ प्रदानात्ते प्रजापुष्टिः सर्वत्राऽस्तु मम्मा
क्षया ॥ भाण्डरूपाणि यान्यत्र कल्पितानि मयानव ॥ भूत्वा सन्त्वात्र
रूपाणि उपतिष्ठन्तितानि च ॥ ततो दक्षिणाद्रव्यारणपादाय ॥ अद्य
कृतैतदापाकदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथानाम
गोत्रायेत्यादि ॥ कोदादिति कामस्तुतिं पूर्ववत् ॥ अथ काष्ठपादु
कादानम् ॥ ततः आचम्य गंधादिना देयब्राह्मणेनाभिः संपूज्य ॥ वारि
णा देयमभिषिञ्च्य ॥ कुशादिकमादाय ॥ अद्याऽशौचान्तद्वि
तीयेह्नि अमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोक
प्राप्तिपूर्वकदिव्यध्वजपताकारथमाप्तिकाम इमे पादुके वनस्पति
दैवते यथानामगोत्रायेत्यादि ॥ स्वस्तीति प्रतिवचनम् ॥ कण्टको
च्छिष्टपाषाणवृश्चिकादिनिवारणे ॥ पादुके ये प्रदास्यामि विप्रश्री
त्या प्रगृह्यताम् ॥ ततो दक्षिणाद्रव्यारणपादाय ॥ अद्य कृतैतत्काष्ठ
पादुकादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथानामगोत्राये
५ त्यादि ॥ कामस्तुतिं पूर्ववत् ॥ ततः सव्येनैव ॥ पूर्वाभिमुखः कुशोद
केन ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुण्ड
रीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इति पठित्वा ॥ पुण्डरीकाक्षः
पुनातु ॥ इति पुण्डरीकाक्षं स्मृत्वा आत्मीयद्रव्याण्यात्मानञ्च षिञ्चे
त ॥ ततः कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रस्याऽमुकप्रेत
स्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतोः षोडशश्राद्धान्तर्गताऽद्यमा
सिकश्राद्धमहं करिष्ये ॥ इति संकल्पं कुर्यात् ॥ कृतोपवीती ब्राह्मण-

प्रतिवचनम्॥नमो देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च॥नमः स्व
हायै स्वधायै नित्यमेव नमो नमः॥इति त्रिवारं पठेत्॥ततोऽपसव्येन कृ
त्वा दक्षिणाऽभिमुखः पातितवामजानुः॥कुशादीन्यादाय॥अद्या
ऽमुकगोत्रस्याऽमुकप्रेतस्य आद्यमासिकश्राद्धे इदमासनं मयादी
यते तवोपतिष्ठताम् इति कुशरूपमासनं दक्षिणाग्रमुत्सृजेत्॥अ
थ छत्रदानम्॥ततः सव्यं कृत्वा प्राङ्मुख उपविष्टः छत्राय नमः॥ब्रा
ह्मणाय नमः॥देयब्राह्मणौ त्रिः संपूज्य॥छत्रमभिषिंच्य॥कुशादि
कमादाय॥अद्याऽमुकगोत्रस्य अमुकप्रेतस्य यमपथ्याऽधिकर
णकघोरातपनिवारणार्थमिदं छत्रमुत्तानाङ्गिरोदैवतममुकगोत्रा
याऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥सर्वेषामेव दानानां छ
त्रमातपवारणम्॥सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं प्रयच्छतु॥इ
त्युक्त्वा विप्रहस्ते जलं दद्यात्॥स्वस्तीति प्रतिवचनम्॥ततः कुशतिल
जलं दक्षिणाद्रव्याण्यादाय॥अद्य कृतैतच्छत्रदानप्रतिष्ठार्थमिदं हि
रण्यमग्निदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं
संप्रददे॥इति दक्षिणां दद्यात्॥प्रतिगृह्णीता स्वस्तीत्युक्त्वा छत्रं दण्डं
धारयेत्॥अथ उपानद्दानम्॥उपानद्भ्यां नमः॥ब्राह्मणाय नमः॥इति
देयब्राह्मणौ त्रिः संपूज्य॥उपानहावभिषिंच्य॥कुशादीन्यादाय॥अ
द्याऽमुकगोत्रस्याऽमुकप्रेतस्य सन्तप्तवालुकासितकण्टकितभूदु
र्गसंतरणार्थमिमे उपानहावुत्तानाङ्गिरोदैवते अमुकगोत्रायेत्या
दि॥उपानहौ प्रदास्यामि कण्टकादिनिवारणे॥सर्वस्थानेषु सु
खदे अतः शान्तिं प्रयच्छ नमः॥इति दद्यात्॥स्वस्तीति प्रतिवचनम्॥
सदक्षिणां कुशादीन्यादाय॥अद्य कृतैतदुपानद्दानप्रतिष्ठार्थमि

हिरण्यमग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं
संप्रददे॥ इति दक्षिणां दद्यात्॥ प्रतिगृहीतास्वस्तीत्युक्त्वा उपानहा
वारोहयेत्॥ अथ यष्टिदानम्॥ गन्धादिना देयब्राह्मणौ त्रिः सम्पू
ज्य॥ वारिणा देयमभिषिंच्य॥ कुशादिकमादाय॥ अद्याऽमुकगो
त्रस्य अमुकप्रेतस्य सर्वप्राणिभ्यो निर्भयत्वाऽरण्यावाप्तिकाम इमां
यष्टिं वनस्पतिदैवतममुकगोत्रायेत्यादि॥ प्रदद्यान्निर्यथा वर्णो यो
दण्डं ब्रह्मचारिणे॥ समस्तपुरुषो लोके ब्रह्मवर्चसमश्नुते॥ ततः
सदक्षिणां कुशादीन्यादाय॥ अद्य कृतैतद्यष्टिदानप्रतिष्ठार्थमि
दं हिरण्यं अग्निदैवतं यथानामगोत्रायेत्यादि॥ प्रतिगृहीतास्वस्ती
त्युक्त्वा यष्टिं स्पृशेत्॥ अथाश्वदानम्॥ अश्वब्राह्मणौ त्रिः संपूज्य॥ वा
रिणा देयमभिषिंच्य॥ कुशादीन्यादाय॥ अद्यामुकप्रेतस्याऽति
शय विषमभूदुर्गसन्तरणार्थं ममुमश्वं यमदैवतं ममुकगोत्राये
त्यादि॥ विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः॥ चन्द्राऽर्कवा
हनं नित्यमतः शान्तिं प्रयच्छ मे॥ इति दद्यात्॥ प्रतिगृहीतास्वस्तीत्यु
क्त्वा अश्वस्य दक्षिणकर्णं स्पृशेत्॥ अथ शिविकादानम्॥ देयब्रा
ह्मणौ त्रिः संपूज्य॥ शिविकामभ्युक्ष्य॥ कुशादीन्यादाय॥ अद्या
ऽमुकगोत्रस्याऽमुकप्रेतस्य उच्चावचविषमभूसंतरणार्थमिमां
शिविकामुत्तानाङ्गिरैदैवताममुकगोत्रायेत्यादि॥ देवदेव जग
न्नाथ विश्वात्मन्दत्तयानया॥ प्रभो शिविकया देवप्रीतो भव जना
र्दनः॥ इति दद्यात्॥ कुशादीनि दक्षिणां चादाय॥ अद्य कृतैतच्छि
विकादानप्रतिष्ठासिद्ध्यर्थमिदं हिरण्यमग्निदैवतं ममुकगोत्रा
येत्यादि॥ इति दक्षिणां दद्यात्॥ ततः प्रतिग्रहीतास्वस्तीत्युक्त्वा शिवि
कां स्पृशेत्॥ अथ हलिदानम्॥ देयब्राह्मणौ त्रिः संपूज्य॥ वारि

णादेयमभ्युक्ष्य॥कुशादीन्यादाय॥अद्याऽमुकगोत्रस्याऽमुकप्रेत
स्यअन्यत्रविषमभूसञ्चरणार्थममुंगजंहिमदैवतंअमुकगोत्रा
येत्यादि॥ऐरावतकुलोद्भूतयस्मात्सागरसंभव॥दानेनाऽनेन
देवेशप्रीतोभवजनार्दन॥सदक्षिणाकुशादीन्यादाय॥अद्यकु
शैतत्कृतदानप्रतिष्ठार्थंहिरण्यमग्निदैवतंयथानामगोत्रायेत्यादि
॥ततआचम्याऽपसव्यंकृत्वादक्षिणाभिमुखःपातितवामजानु
अपहताअसुरारक्षांसिवेदिषदः॥इतिश्राद्धदेशेवामावर्तेन
तिलान्विकिरेत्॥ततोहस्तार्घ्यपात्रोपरि॥पवित्रेस्थोवैष्णव्यौस
वितुर्वःप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः॥इतिद
क्षिणाग्रेपवित्रेधृत्वा॥शन्नोदेवीरभिष्टयआपोभवन्तुपीतये॥
शंय्योरभिस्रवन्तुनः॥तिलोसिसोमदैवत्योगोसवोदेवनिर्मितः
प्रयत्नमद्भिःपृक्तःस्वधयापितृल्लोकान्प्रीणाहिनःस्वाहा॥
इतितिलान्क्षिप्त्वा॥श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेन
क्षत्राणिरूपमश्विनौव्यात्तम्॥इष्णन्निषाणामुम्मइषाणसर्व
लोकंम्मइषाण॥इतिपुष्पंक्षिपेत्॥गन्धद्वारांदुराधर्षांन
नित्यपुष्टांकरीषिणीम्॥ईश्वरींसर्वभूतानांतामिहोपह्वये
श्रियम्॥इतिगन्धंक्षिपेत्॥हस्तार्घपात्रंसंपन्नमितिब्राह्मणं
स्पृष्ट्वा॥सुसंपन्नमितितेनोक्ते॥हस्तार्घपात्रंवामहस्तेकृत्वा॥
नमोनारायणायेति॥पुष्पसहितंपवित्रंविप्रहस्तेउत्तराग्रंधृ
त्वा॥यादिव्याआपःपयसासम्बभूवुर्याअन्तरिक्षाउतपा
र्थिवीर्याःहिरण्यवर्णायज्ञियास्तानआपःशिवासंस्यो

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

नाःसुहवाभवन्तु॥इत्यनेन हस्तार्घपात्रस्थजलमभिमंत्र्य॥कुशादि
कमादाय॥अद्याऽमुकगोत्राऽमुकप्रेताऽद्यमासिकश्राद्धे एष हस्ता
र्घस्ते मयादीयते तवोपतिष्ठताम् इति विप्रकरे पवित्रोपरि अर्घजलं
दद्यादुत्सृजेत्॥ब्राह्मणस्य वामपार्श्वे प्रेताय स्थानमसीति उत्तानमेव
स्थापयेत्॥तदुपरि कुशान् दद्यात्॥तच्च दक्षिणादान पर्यन्तं न चाल
येत्॥ततस्तत्पात्रं ब्राह्मणं गंधपुष्पाक्षतधूपदीपनैवेद्याऽऽदिभिः पू
जयेत्॥अथ यज्ञोपवीतदानम्॥सव्यं कृत्वा॥आचम्य देयं ब्राह्मणो
त्रिः संपूज्य॥कुशादिकमादाय॥अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य
विप्रत्वचतुर्वेदित्वसुधियत्वकाम इदं यज्ञोपवीतं विष्णुदैवतं यथा
नामगोत्रायेत्यादि॥दक्षिणाद्रव्यं हिरण्यं पूर्ववत्॥अपसव्येन॥
कुशादीन्यादाय॥अद्याऽमुकगोत्राऽमुकप्रेताऽद्यमासिकश्राद्धे एत
तानि गंधपुष्पाक्षतधूपदीपनैवेद्ययज्ञोपवीतवासांसि ते मयादी
यन्ते तवोपतिष्ठन्ताम्॥इत्युत्सृजेत्॥ततः सव्यं कृत्वा आचम्य॥अ
पसव्यं कृत्वा॥अर्च्चनविधेः सर्वं परिपूर्णमस्तु॥अस्तु परिपूर्णमि
ति वचनम्॥ततो गोरमृत्तिकया नीवारचूर्णेन जलेन वा ब्राह्मणं
वेष्टयित्वा चतुरस्रं मण्डलं कुर्यात्॥परकीयभूमौ श्राद्धकरणे श्रा
द्धीयवस्तुषु किञ्चित् किञ्चिदुद्धृत्य॥तिलघृतमधुजलयुक्तमन्न
मादाय॥इदमन्नमेतद्भूस्वामिपितृभ्यो नमः॥इत्युत्सृजेत्॥ततउत्तम
न्नं ताम्रपात्रेण करभ्यामादाय॥पात्रालम्भनाङ्गुष्ठावगाहनं विना
॥पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि
स्वाहा॥इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्॥समूढमस्य पांसु
रे स्वाहा॥इति पठित्वा॥अपहता असुरा रक्षांसि वेदिषदः॥

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDR

इत्यन्नोपरि तिलान् विकिरेत्॥ अमृतरूपतयाऽन्नं विचिन्त्य॥ कु
शादिकमादाय॥ अद्याऽमुकगोत्रायाऽमुकप्रेतायाऽद्य मासि
कश्राद्धे इदमन्नं सोपकरणं मया दीयते तवोपतिष्ठतामिति
उत्सृजेत्॥ ततो भवान् प्राशयतु॥ इत्यपोशानं दत्त्वा॥ यथा
सुखं जुषस्वेति ब्राह्मणं ब्रूयात्॥ ब्राह्मणश्च वामेन पाणिना
ऽन्नपात्रमस्पृशन् भुञ्जीत॥ संतत्याभक्ष्यप्रार्थनं कुर्यात्॥ ततः
सव्येन श्राद्धकर्ता· मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः॥ मा
ध्वीर्नः सन्त्वोषधीः॥ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः॥ म
धु द्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमाँ २॥ अस्तु सूर्य्यः
माध्वीर्गावो भवन्तु नः॥ मधु· मधु· मधु॥ अन्नहीनं क्रियाहीनं विधि
हीनं च यद्भवेत्॥ तत्सर्वमच्छिद्रमस्तु॥ नमस्तुभ्यं विरूपाक्ष नमस्ते
ऽनेकचक्षुषे॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः॥ इति पठेत्॥
वीरणादिभिर्ब्राह्मणं हर्षयन् व्यञ्जनगुणान् कीर्त्तयेत्॥ तस्य यत्र यत्रेच्छो
पलभ्यते तत्तदुपनयन्मंदं मन्दं भोजयेत्॥ अत्र विकिर निषेधः॥
ततो ब्राह्मणं तृप्तं ज्ञात्वा· अपसव्येन॥ तस्मै जलगण्डूषमिदन्ते
॥ इति प्रत्यपोशानं दद्यात्॥ अत्र स्वदितमिति प्रश्नाऽभावात् कुरुष्व
इति नोक्ते॥ तदुच्छिष्टसमीपे चतुरस्रं हस्तैकप्रमाणं दक्षिणप्र
प्लवं चतुरङ्गुलोच्छ्रितं पिण्डस्थानं निर्माय॥ तत्र रेखाकरणं उल्मुकं
भ्रामणं च न भवति॥ ततश्छिन्नमूलकुशान् दक्षिणाग्रान् तत्रास्ती
र्य॥ तत्र पूरकादिकं गन्धजलयुतं वामहस्ते कृत्वा॥ दक्षिणह
स्तेन कुशादिकमादाय॥ अद्याऽमुकगोत्राऽमुकप्रेताऽद्य मासि

Nepal Sanskrit University, Balmeeki Campus, Kat...

कश्राद्धे पिण्डस्थाने इदमवजनन्ते मयादीयतेनवोपतिष्ठतामिति
कुशोपरि अवनेजनं दद्यात् ॥ ततः श्राद्धशेषमन्नं तिलजलघृतमधुयु
तमेकीकृत्य तेन कपित्थप्रमाणं पिण्डं निर्माय ॥ दक्षिणहस्तेनादा
य ॥ अद्यामुकगोत्रऽमुकप्रेत आद्यमासिकश्राद्धे एषपिण्डस्ते मया
दीयते नवोपतिष्ठताम् ॥ इत्यवनेजनस्थाने पिण्डं दद्यात् ॥ आस्तत
कुशमूलेन करं प्रोक्ष्य ॥ सव्येनाचम्य ॥ हरिं स्मरेत् ॥ अपसव्यं कृत्वा
॥ मंत्रपाठनिषेधात्तूष्णीमेव भास्वरमूर्तिं प्रेतं चिंतयेत् ॥ अवने
जनाऽवशिष्टजलयुतं पात्रं वामहस्ते कृत्वा ॥ दक्षिणहस्तेन कु
शाग्रादिकमादाय ॥ अद्याऽमुकगोत्राऽमुकप्रेताऽमासिकश्राद्धे इ
दं पिण्डप्रत्यवनेजनं ते मयादीयते नवोपतिष्ठताम् इति पिण्डो
परि प्रत्यवनेजनं दद्यात् ॥ ततो नीविं विस्रस्य ॥ सव्यं कृत्वा आ
चम्य ॥ अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणहस्ते
न गृहीत्वा ॥ प्रेतैतत्ते वासः ॥ इति पिण्डोपरि सूत्रं दत्वा ॥ ततो
गंधपुष्पाक्षतवस्त्रोपायनादिभिः पिण्डं संपूज्य ॥ कुशादी
न्यादाय ॥ अद्याऽमुकगोत्राऽमुकप्रेताऽद्यमासिकश्राद्धपिण्डे
एतानि सूत्रगंधपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयंते नवो
पतिष्ठताम् ॥ इत्युत्सृजेत् ॥ पिण्डशेषान्नं पिण्डसमीपे विकिरे
त् ॥ ततः आचान्तब्राह्मणस्य करे । शिवा आपः संतु इति जलम् ॥
सौमनस्यमस्तु इति पुष्पम् ॥ अक्षतं चारिष्टमस्तु इति तण्डुलान्
इति दत्वा ॥ स्वस्ति इति प्रतिवचनम् ॥ ततः पुटकादिपात्रे शान्त्युद
कं परिकल्प्य मेदिनीं शिरसाऽभिवन्द्य ॥ इमं मंत्रं पठेत् ॥ नमो

नमो मेदिनीलोकधात्रि उर्वी महीशैलधारिणी धरणि नमः ॥ धा
रिणि काश्यपि पिजगन्प्रतिष्ठे वसुधे नमोस्तु वैष्णवी लोकधात्रि नमोस्तु
ते सर्वरसप्रतिष्ठे निवायना वीचि नमो नमोस्तुते ॥ ततः कुशाशेन्पादा
य ॥ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्याऽद्यमासिकश्राद्धे दत्तैतदन्नपा
नादिकमुपतिष्ठतामित्यक्षय्योदकं विप्रहस्ते दद्यात् ॥ उपतिष्ठता
मिति प्रतिवचनम् ॥ सव्यं कृत्वा दक्षिणां दिशं पश्यन् ॥ अघोरः प्रेतोस्तु
इति पूर्वाग्रां जलधारां पिण्डोपरि दद्यात् ॥ गोत्रन्नो वर्द्धतामिति आशि
षः प्रार्थनमंत्रनिषेधः ॥ ततोऽपसव्यं कृत्वा सपवित्रकुशत्रयं पिण्डो
परि दक्षिणाऽग्रं धृत्वा ॥ नमो वाचयिष्ये इति पृच्छेत् ॥ वाच्यतामि
ति अनुज्ञातः प्रेताय नमः ॥ इत्युच्यतामिति वदेत् ॥ अस्तु नमः इत्युच्य
माने ॥ घटकादिस्थितजलादिना मंत्रपाठं विना ॥ इदमर्घ्यमेतन्मया
दीयते तवोपतिष्ठतामिति दक्षिणाग्रां पयोधारां सपवित्रकुशो
परि दद्यात् ॥ ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत् ॥ छिन्नमू
लकुशान्वह्नौ क्षिपेत् ॥ अर्घपात्रं संचाल्य ॥ सव्यं कृत्वा ॥ कुशा
दिसहितं दक्षिणाद्रव्यमादाय ॥ अद्याऽमुकगोत्रस्याऽमुकप्रेत
स्याऽद्यमासिकश्राद्धप्रतिष्ठासिद्ध्यर्थमिदं रजतं चन्द्रदैवतं अमु
कगोत्रायेत्यादि ॥ इति दक्षिणां दद्यात् ॥ स्वस्तीति प्रतिवचन
म् ॥ अत्र प्रदक्षिणीकरणम् ॥ अन्नव्रजनं च न भवति ॥ ततोऽप
सव्येन स्वस्त्यस्तु इत्युक्त्वा ब्राह्मणमुत्थाप्य शय्यायामुपवेश
येत् ॥ ब्राह्मणचरणौ संवाह्य तं नमस्कुर्यात् ॥ ततो जनकं कति
काञ्चनं ब्राह्मणायाऽर्पयेसवांजनकं कतिकाञ्चनमादायश

प्यायां मुहूर्त्तं विश्रामं कुर्यात्॥ ततः कर्त्ता सव्यं कृत्वा॥ देवताभ्यः
पितृभ्यश्च महायोगिभ्य एव च॥ नमः स्वाहायै स्वधायै नित्यमे
व नमो नमः॥ इति त्रिर्जप्त्वा॥ अपसव्यं कृत्वा श्राद्धीयदीपमाच्छाद्य
॥ हस्तौ पादौ प्रक्षाल्य॥ सव्येनाचमनं कुर्यात्॥ ततः श्राद्धसंपूर्णताका
मः॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च॥ स्मरणादेव तद्विष्णोः
संपूर्णं स्यादिति श्रुतिः॥ इति पठित्वा विष्णुं स्मरेत्॥ इति षोडशश्रा
द्धमध्ये आद्यमासिकश्राद्धस्य एकादशाहे एव विधानादाद्यमासिक
स्य सपात्रकप्रयोगः॥ अथाऽऽद्यादिकश्राद्धम्॥ प्रथममासिकश्राद्धा
नन्तरं स्नानादिकं विधाय आद्यादिकं कुर्यात्॥ आद्यादिकस्यै
कादशाहे एव विधानात्॥ तच्च सिद्धान्नेनैव विधेयम्॥ अथवा आमा
न्नेन कुर्यात्॥ तत्र क्रमः कर्त्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितं पज्व
लितदीपं स्थापितगोरसर्षपतिलादिरक्षोघ्नं श्राद्धदेशमागत्य पू
र्वाऽभिमुख उपविश्य पञ्चगव्येनाभ्युक्ष्य॥ कुशजलेन अपवित्र
पवित्रो वेति पठित्वा॥ पुण्डरीकाक्षः पुनातु इत्यनुच्चार्य श्राद्धदेशं
द्रव्याण्यात्मानं च सिञ्चेत्॥ ततः कुशादिकमादाय॥ अद्येत्यादिदेशका
लौ स्मृत्वा ऽमुकगोत्रस्याऽमुकप्रेतस्य आद्यादिकश्राद्धमहं करिष्ये
॥ इति संकल्पं कुर्यात्॥ ततो देवताभ्य इति त्रिः पठेत्॥ ततोऽपसव्येन
कुशादिकमादाय॥ अद्याऽमुकगोत्रस्य अमुकप्रेतस्याऽऽद्यादिक
श्राद्धे इदमासनं तेऽमया दीयते तवोपतिष्ठताम्॥ इति कुशरूपमास
नमुत्सृजेत्॥ ततः अपहता असुरा रक्षांसि वेदिषद इति वामाव
र्त्तेन तिलान् श्राद्धदेशे विकिरेत्॥ ततः पुटकादौ पवित्रे स्थ इति मंत्रे

णाद् क्षिणाग्रं पवित्रं धृत्वा ॥ शन्नोदेवीरिति मंत्रेण तत्र जलं क्षिपे
त् ॥ तिलोसीति मंत्रेण तिलान् प्रक्षिप्य ॥ गन्धद्वारामिति मंत्रेण
गन्धम् ॥ श्रीश्चते इति मंत्रेण पुष्पं क्षिपेत् ॥ ततस्तदर्घपात्रं वामह
स्ते कृत्वा ॥ पुष्पसहितं पवित्रं नमो नारायणायेति मंत्रेणान्न
पात्रोपरि उत्तराग्रं पवित्रं धृत्वा ॥ यादिव्या इति मंत्रेणार्घपात्र
स्य जलमभिमंत्र्य ॥ कुशादिकमादाय ॥ अद्याऽमुकगोत्राऽमुक
प्रेताऽद्याद्विकश्राद्धे एष ते ह्यर्घस्ते मया दीयते तवोपतिष्ठता
म् ॥ इति पवित्रोपरि अर्घजलं दद्यादुत्सृजेत् ॥ ततः पवित्रादिसहि
तमर्घपात्रमासनस्य वामपार्श्वे प्रेतायस्थानमसीति उत्तानमे
व स्थापयेत् ॥ ततो गंधादिना ब्राह्मणं सम्पूज्य ॥ कुशादीन्यादाय
अद्याऽमुकगोत्राऽमुकप्रेत आद्याद्विकश्राद्धे एतानि गंधपुष्पा
क्षतधूपदीपनैवेद्यवस्त्रोपायनादीनि ते मया दीयन्ते तवोप
तिष्ठंताम् ॥ इति गन्धादिकमुत्सृजेत् ॥ तत आसनस्याऽन्नपात्रसहि
तस्य चतुर्दिक्षु चतुरस्रं मण्डलं कृत्वा ॥ श्राद्धीयान्नाग्रभागं तिलघृ
तजलयुतपृथक्कारे कृत्वा ॥ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः ॥
इत्युत्सृजेत् ॥ अन्नसंकल्पार्थम् ॥ पृथ्वीवत् भिक्षमन्नं सोपक
रमुपनीय ॥ तिलघृतजलं चोपनीय अन्नं मधुनाऽभिघार्य ॥ पात्रा
लंभनाङ्गुष्ठावगाहनं विना ॥ पृथिवी ते पात्रमित्यादिस्वाहान्तम् ॥
इदं विष्णुरित्यादि पठित्वा ॥ अपहता असुरा रक्षांसि वेदिषद ॥
इत्यन्नोपरि तिलान् विकीर्य ॥ कुशादिकमादाय ॥ अद्यामुकगो
त्रायाऽमुकप्रेतायाऽद्याद्विकश्राद्धे इदमन्नं सोपकरणं ते मया

दीयते तवोपतिष्ठताम् इत्यन्नमुत्सृजेत्॥ सव्येन ततो मधुवाते
ति त्रिकं च पठेत्॥ मधु मधु मधु॥ अन्नहीनमित्यादि मन्त्रम्॥ नम
स्त्वं विरूपाक्षेति श्लोकं च पठेत्॥ अत्र विकिररेखाकरणे लमुकश्रा
मरणं च न भवति॥ सव्यं कृत्वाचम्य॥ अपसव्यं कृत्वा वेदिकां निर्माय
॥ तदुपरि छिन्नमूलकुशान् दक्षिणाग्रानास्तीर्य॥ तिलजलगन्धयु
तं परकं वामहस्ते कृत्वा॥ कुशादिकमादाय॥ अद्या ऽमुकगोत्रा ऽमुक
प्रेता ऽ द्याब्दिकश्राद्धपिण्डस्थाने ऽत्रावनेजनं ते तवोपतिष्ठतामिति
अवनेजनं छिन्नमूलकुशोपरि दद्यात्॥ ततस्तिलघृतमधुकेनान्नेन
कपित्थप्रमाणं पिण्डं कृत्वा॥ कुशादिनि पिण्डं चादाय॥ अद्या ऽ
मुकगोत्रा ऽमुकप्रेता ऽ द्याब्दिकश्राद्धे एष पिण्डस्ते मया दीयते
तवोपतिष्ठतामित्यवनेजनस्थाने पिण्डं दद्यात्॥ ततो दर्भमू
लेन करं प्रोक्ष्य॥ सव्यं कृत्वा आचम्य हरिं स्मृत्वा॥ अपसव्यं कृ
त्वा मन्त्रपाठं विना तूष्णीं भास्वरमूर्त्तिं प्रेतं चिन्तयेत्॥ ततो ऽवनेजना
ऽवशिष्टजलयुतं पात्रं वामहस्ते कृत्वा॥ दक्षिणहस्तेन कुशादि
कमादाय॥ अद्या ऽमुकगोत्रा ऽमुकप्रेता ऽ द्याब्दिकश्राद्धे पिण्डे ऽ
त्र प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पि
ण्डोपरि दद्यात्॥ ततो नीविं विस्रंस्य॥ सव्यं कृत्वा ऽ चम्य॥ अपसव्यं कृ
त्वा॥ वामेन पाणिना घृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां
पिण्डोपरि॥ प्रेतैतत्ते वासः इति सूत्रं दत्त्वा पिण्डमभ्यर्च्य॥ कुशादी
न्यादाय॥ अद्या ऽमुकगोत्रा ऽमुकप्रेता ऽ द्याब्दिकश्राद्धपिण्डे एतानि
सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्ता
म्॥ इति उत्सृजेत्॥ ततः पिण्डशेषान्नं पिण्डसमीपे विकिरेत्॥ त्रि

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

शिवा आपः सन्त्विति जलम्॥ सौमनस्यमस्त्विति पुष्पम्॥ अक्षतं चा
रिष्टमस्त्विति तण्डुलान्॥ अन्नपात्रोपरि क्षिपेत्॥ कुशादीन्यादाय॥
अद्यामुकगोत्रस्यामुकप्रेतस्याद्याब्दिकश्राद्धे दत्तैतदन्नपानादि
कमक्षय्यमुपतिष्ठताम्॥ इत्यक्षय्योदकं दद्यात्॥ सव्यं कृत्वा॥
अघोरः प्रेतोस्तु॥ इति पूर्वाग्रां जलधारां पिण्डोपरि दक्षिणादिप
रीतं दद्यात्॥ अथाशीः प्रार्थनं भवति॥ ततः अपसव्येन सपवि
त्रान् कुशान् पिण्डोपरि धृत्वा पुटकादिस्थजलादिना मंत्रपाठं
विना॥ इदमूर्जन्ने मयादीयतेऽनेनोपतिष्ठतामिति सपवित्रकुशोप
रि दक्षिणाग्रां पयोधारां दद्यात्॥ ततः पिण्डमाघ्राप्योत्थापयेत्॥
पिण्डाधारकुशान्वह्नौ क्षिपेत्॥ अर्घपात्रं संचाल्य॥ सव्यं कृत्वा॥
कुशादीन् दक्षिणाद्रव्याणि चादाय॥ अद्यामुकगोत्रस्यामुकप्रेत
स्याद्याब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानाम गोत्राय १०
यथानामशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे॥ इति दक्षिणां
दद्यात्॥ ततो देवताभ्यः इति त्रिः पठेत्॥ ततोऽपसव्येन॥ दीपमाच्छा
द्य हस्तौ पादौ प्रक्षाल्य॥ सव्येनाचम्य॥ प्रमादात्कुर्वतां कर्म प्र
च्यवेताध्वरेषु॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥
इति पठित्वा॥ विष्णुस्मरणं कुर्यात्॥ श्राद्धोपकल्पं ब्राह्मणाय प्रति
पादयेत्॥ सिद्धान्नं जले क्षिपेत्॥ इति आद्याब्दिकश्राद्धप्रयोगः॥
अथोदककुम्भदानम्॥ अथ प्रयोगः॥ एकादशेऽह्नि कर्ता शुचिरा
चान्तः प्राङ्मुखोपविश्य सव्येन कुशतिलजलान्यादाय॥
अद्य पितृगताऽहरहरन्नोपस्थितिस्वगताऽश्वमेधयज्ञजन्य
फलसमफलप्राप्तिकामोऽद्यादि पितृमरणादिनावधिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

NGMPP/Nepal Public Domain-Digitization-Gangotri Funding: MIDF

गौ च्यावच्छिन्नदिनेनवत्सरं यावत्प्रत्यहं प्रति मासं वा तद्दिने एव
वा अमुक गोत्राया ऽमुकप्रेताय साम्नोदकुम्भदानमहं करिष्ये॥
इति सङ्कल्प॥ अपसव्यं कृत्वा॥ कुशादीन्यादाय॥ अद्या ऽमुकगो
त्रस्य ऽमुकप्रेतस्य इदमासनं मे मयाद्धीयते तवोपतिष्ठताम् मिति
आसनमुत्सृज्य॥ ततो गन्धादिना संपूज्य॥ कुशादिकमादाय॥
अद्या ऽमुकगोत्र ऽमुकप्रेत एतानि गन्धपुष्पाक्षत धूपदीपनैवेद्य
वासांसि ते मयादीयन्ते तवोपतिष्ठन्ताम्॥ इत्युत्सृज्य सोपकरणम
न्नं नवं जलपूर्णकुम्भं चोपनीय॥ कुशादीन्यादाय॥ अद्या ऽमुकगो
त्राया ऽमुकप्रेताय अयं साम्नोदकुम्भस्ते मया दीयते तवोपतिष्ठता
म्॥ इत्युत्सृजेत्॥ वर्षाभ्यन्तरे सपिण्डनेकृते तु॥ अद्या ऽमुकगोत्रस्य
पितुरमुकशर्म्मण इदमासनं ते स्वधा॥ ततो गन्धादीनि सम्पूज्य
॥इत्युत्सृज्य॥ कुशादिकमादाय॥ अद्या ऽमुकगोत्रास्मत्पितरमुक
शर्मन्नेतानि गन्धादीनि तुभ्यं स्वधा॥ इत्युत्सृज्य॥ कुशादिकमादाय
अद्या ऽमुकगोत्राय अस्मत्पित्रे मुकशर्मणे अयं साम्नोदककुम्भ
स्तुभ्यं स्वधा॥ ततः कुशादिसहितं दक्षिणाद्रव्यमादाय॥ अद्यकृ
तैतत्साम्नोदककुम्भदानप्रतिष्ठार्थं इदं रजतं चन्द्रदैवतं यथानाम
गोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे॥
इति दक्षिणां तुभ्यं च ब्राह्मणाय दद्यात्॥ एवं वर्षपर्यन्तं प्रत्यहं
साम्नोदककुम्भं दत्वा दक्षिणां दद्यात्॥ अशक्तौ प्रतिमासम्॥
अत्र ऽशक्तौ वैदेकादशाहे एव वा दद्यादिति वचनात्प्रयोगो
लिख्यते॥ ततः कर्माएकादशाहे ऽहि शुचिरेवाचान्तः प्राङ्मुख उप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding : MIDF

विरूप॥सव्येन कुशतिलजलान्यादाय॥अद्यपितृगताऽहरहस्सो
दककुम्भोपस्थितिस्वर्गताश्वमेधयज्ञजन्यसमफलप्राप्तिका
मोऽद्यैव ब्राह्मणस्थापनपूजनपूर्वकषष्ट्यधिकशतत्रयसा
न्नोदककुम्भदानं तथा तावत्संख्याकदन्तधावनकाष्ठदानं त
था तावत्संख्याकजलाञ्जलिदानं च अहं करिष्ये॥इति प्रतिज्ञा
सङ्कल्पं कुर्यात्॥रक्षोघ्नदीपं प्रज्वाल्य॥ततोऽपसव्येन॥दक्षि
णाभिमुखोऽन्नोपरिस्थापितस्याग्रस्थितकलशमुखे आमान्नभा
गं संस्थाप्य॥तत्र कुशनिर्मितब्राह्मणं संस्थाप्य॥कुशादिकमादाय
॥अद्यामुकगोत्रस्याऽमुकप्रेतस्येदमासनन्तेमयादीयतेतवोप
तिष्ठतामित्यासनमुत्सृज्य॥गंधपुष्पाक्षतधूपदीपनैवेद्यो
पायनद्रव्यादिभिः सम्पूज्य॥कुशादिकमादाय॥अद्याऽमुकगो
त्राऽमुकप्रेतैतानि गंधपुष्पाक्षतधूपदीपनैवेद्योपायनद्रव्या
दीनितेमयादीयंतेतवोपतिष्ठताम्॥इत्युत्सृज्य॥ततआशौ
चान्तदिनादुत्तरवत्सरदिनसंख्याकान् साऽन्नोदककुम्भानुपनी
य॥कुशादीन्यादाय॥अद्याऽमुकगोत्रायामुकप्रेतायामर
णदिनाऽवधिकाऽऽशौचावच्छिन्नदिनानवत्सरं यावद्दिनानि
षष्ट्यधिकशतत्रयसंख्याकानि तावद्दिनसंख्याकाएते साऽन्नो
दककुम्भाः सदन्तधावनकाष्ठास्तेमयादीयन्तेतवोपतिष्ठ
न्ताम् इत्युत्सृजेत्॥तावन्तोजलयोदद्युः॥ततः सव्येन कुशा
दिसहितद्रव्याण्यादाय॥अद्यकृतैतत्साऽन्नोदकषष्ट्य
धिकशतत्रयसंख्याकदन्तधावनकाष्ठयुतकुम्भदान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिष्ठार्थं तथा॰ तावत्संख्याकमञ्जलिदानप्रतिष्ठार्थं इदर
जतं चन्द्रदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय
दक्षिणान्तत्त्वमहं संप्रददे॥ तदुभयं ब्राह्मणाय दद्यात्॥ इ
त्युदककुम्भदानविधिः॥ अथोनमासिकादिपञ्चदशश्राद्धा
नि तत्रक्रमः॥ कर्त्ता स्नानः शुचिराचान्तः पूर्वोपकल्पितं प्रज्वा
लितदीपैः स्थापितगौरसर्षपतिलादिरक्षोघ्नं श्राद्धदेशमागत्य
पूर्वाभिमुखउपविश्य॥ कुशजलेन॥ अपवित्रः पवित्रोवेतीत्या
दि पठित्वा पुण्डरीकाक्षः पुनातु॥ इत्युच्चार्य श्राद्धदेशं द्रव्याण्या
त्मानं च सिंचेत्॥ ततः कुशादिकमादाय॥ अद्यामुकगोत्रस्यामु
कप्रेतस्य विमुक्त्युत्तमलोकप्राप्तिहेतवे ऽद्यश्राद्धान्तर्गतोनमा
सिकश्राद्धमहं करिष्ये॥ इति संकल्पं कुर्यात्॥ ततो देवताभ्यः
पितृभ्यश्चेति पठेत्॥ ततो ऽपसव्येन कुशादीन्यादाय॥ अद्यामुकगो
त्रस्यामुकप्रेतस्य ऊनमासिकश्राद्धे इदमासनं तेमया दीयते नवोपति
ष्ठताम्॥ इति कुशरूपमासनमुत्सृजेत्॥ ततः अपहता ऽअसुरा रक्षां
सि वेदिषदः॥ इति वामावर्तेन तिलान् श्राद्धदेशे विकिरेत्॥ ततः प्र
कासे पवित्रेस्थ इति मंत्रेण दक्षिणाग्र पवित्रं धृत्वा॥ शन्नो देवीति मं
त्रेण तत्र जलं क्षिपेत्॥ तिलोसीति मंत्रेण तिलान् प्रक्षिप्य॥ गंधद्वा
रामिति मंत्रेण गंधं च॥ श्रीश्चतेति मंत्रेण पुष्पं क्षिपेत्॥ ततस्तदर्घपा
त्रं वामहस्ते कृत्वा पुष्पसहितं नमो नारायणायेति मंत्रेणान्नपात्रोप
रि उत्तराग्रं धृत्वा॥ या दिव्या ऽआप इति मंत्रेणार्घपात्रस्थं जलम
भिमंत्र्य॥ कुशादीन्यादाय॥ अद्यामुकगोत्रामुकप्रेत ऊनमासिक

श्राद्धे एषहस्तार्घस्ते मयादीयते तवोपतिष्ठताम् इति पवित्रोपरि
अर्घजलं दद्यात् उत्सृजेत्॥ ततः पवित्रादिसहितमर्घपात्रं आसनवा
तदुपरि कुशत्रयं दद्यात्
मपार्श्वे प्रेतस्थानमसीसुत्तानमेवस्थापयेत्॥ ततो गंधादिनासं
पूज्य॥ कुशादिन्यादाय॥ अद्यामुकगोत्रामुकप्रेतउनमासिश्रा
नैवेद्य
द्धे एतागंधपुष्पाक्षतधूपदीपवासांसि ते मयादीयंते तवोपति
ष्ठंतामिति गंधादिकमुत्सृजेत्॥ ततआसनस्यान्नपात्रसहित
स्यचतुर्दिक्षु चतुरस्रमंडलं कृत्वा श्राद्धीयान्नअग्रभागं घृततिल
जलयुतं पट्टकादौ कृत्वा॥ इदमन्नमेतद्धुत्वा मिपितृभ्यो नम इत्यु जलं
त्सृजेत्॥ ततः प्रत्यवन्नं प्रिक्षमं सोपस्करमन्नमुपनीय सतिलं चोप
नीय अन्नं मधुनाभिघार्य्य: पात्रालंभनांगुष्ठावगाहनं विना॥
पृथिवीते पात्रं द्यौरपिधानं इत्यादि स्वाहांतं॥ इदं विष्णुरित्यादि
सूरेइत्यंतं पठित्वा॥ अपहता असुरारक्षांसि वेदिषद इति ति
लान्नोपरि विकीर्य॥ कुशादिकमादाय॥ अद्यामुकगोत्राया
मुकप्रेतायउनमासिकश्राद्धे इदमन्नं सोपकरणं ते मयादीयते त
पठित्वा
वोपतिष्ठतामित्यन्नमुत्सृजेत्॥ ततः सव्येन मधुवाता इति त्रिचं
॥ मधु मधु मधु च पठेत्॥ अन्नहीनमित्यादिमंत्रम्॥ नमस्त्भ्यं वि
रूपाक्षेति श्लोकं च पठेत्॥ अत्र विकरे रेखा उल्मुक भ्रामणं च न भ
पिंडदानार्थं वेदिकां निर्माय
वति॥ सव्यं कृत्वा चम्य अपसव्यं कृत्वा पिंडस्थानोपरि छिन्नमू
लकुशान् दक्षिणाग्रानास्तीर्य॥ तिलजलगंधयुतं पुटकं वाम
हस्ते कृत्वा॥ कुशादिकमादाय॥ अद्यामुकगोत्रमुकप्रेतउन
मासिकश्राद्धे पिंडस्थाने इदमवजनं ते मयादीयते तवोपति

ष्ठतामित्यवनेजनं छिन्नमूलकुशोपरि दद्यात् ॥ ततस्तिलघृतमधु
युक्तेनान्नेन नारिकेलप्रमाणं पिंडं कृत्वा ॥ कुशादिसहितपिंडमा
दाय ॥ अद्यामुकगोत्रामुकप्रेतोऽत्र मासिकश्राद्धे एष पिण्डस्ते मया
दीयते तवोपतिष्ठताम् इत्यवनेजनस्थाने पिण्डं दद्यात् ॥ ततो दर्भ
मूलेन करं प्रोक्ष्य ॥ सव्यं कृत्वा आचम्य (हरिं स्मरेत्) अपसव्यं कृत्वा ॥ मंत्रपा
ठं विना तु पूर्वं भास्करमूर्त्तिं प्रेतं ध्यायेत् ॥ ततोऽवनेजनपात्रं वामह
स्ते कृत्वा ॥ कुशादिकं गृहीत्वा ॥ अद्यामुकगोत्रामुकप्रेतऽत्र मासि
कश्राद्धपिंडे इदमवनेजनं ते मया दीयते तवोपतिष्ठताम् ॥ इति प्रत्यवने
जनं पिंडोपरि दद्यात् ॥ ततो नीवीं विस्रस्य ॥ सव्यं कृत्वा आचम्य अप
सव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ता
भ्यां पिण्डोपरि एतत्ते वास इति सूत्रं धृत्वा ॥ गंधादिभिः पिंडं समभ्यर्च्य
कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोऽत्र मासिकश्राद्धपि
ण्डे एतानि सूत्रगंधपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते त
वोपतिष्ठन्तामित्युत्सृजेत् ॥ ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य
॥ शिवा आपः सन्त्विति जलम् ॥ सौमनस्यमस्त्विति पुष्पम् ॥ अक्षतं
चारिष्टमस्त्विति तंडुलान् ॥ अन्नपात्रोपरि क्षिपेत् ॥ कुशादिकमा
दाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यात्र मासिकश्राद्धे दत्तैतदन्न
पानादिकमुपतिष्ठताम् ॥ इत्यक्षय्योदकं दत्वा सव्यं कृत्वा ॥ अघो
रः प्रेतोऽस्तु इति दक्षिणां दिशं पश्यन् पिंडोपरि पूर्वाग्रां जलधारां
दद्यात् ॥ अत्राशीः प्रार्थनं न भवति ॥ ततः (असंस्पृशन्) पिंडोपरि सपवित्रान्कुशा
न्धृत्वा ॥ उल्कादिस्थजलादिना मंत्रपाठं विना ॥ इदमूर्जेम

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

याज्ञिपतेनवोपतिष्ठनामितिसपवित्रकुशोपरिदक्षिणाग्रार
जलधाराम्दद्यात्॥ततःपिंडमाघ्रायोत्थापयेत्॥पिंडाधारकु
शान्वह्नौक्षिपेत्॥अर्घपात्रंसंचाल्य॥सव्यंकृत्वाकुशादिकमादा
य॥अद्यामुकगोत्रस्यामुकप्रेतस्यकृतैतदूनमासिकश्राद्धप्रति
ष्ठार्थमिदंरजतं(चन्द्रदैवतं)यथानामगोत्रायब्राह्मणायदक्षिणांदातुम
हमुत्सृजेत्॥इतिदक्षिणांदद्यात्॥ततोदेवताभ्यःइतिपठित्वा
वारत्रयं॥ततोऽपसव्यंकृत्वादीपमाच्छाद्य॥हस्तौपादौप्रक्षाल्य॥
सव्येनाचम्य॥प्रमादादित्यादिपठित्वाविष्णुंस्मृत्वा॥श्राद्धीय
वस्तूनिब्राह्मणायप्रतिपादयेत्॥इतिऊनमासिकश्राद्धम्॥ ॥

एवमेवद्वितीयमासिकत्रैपक्षिकमासिकतृतीयमासिकचतुर्थमासिकपं
चममासिकषष्ठममासिकोनषाण्मासिकसप्तममासिकाऽष्टममा
सिकनवममासिकदशममासिकैकादशमासिकद्वादशमासिकऊ
नाब्दिकश्राद्धेषुतत्तत्पदप्रक्षेपेणप्रयोगऊह्यः॥यदिमरणदिना
दारभ्यद्वादशमध्येऽधिकमासस्स्यात्तन्मासिकंद्विवारंकार्य्यम्॥आद्य
मासिकाऽतिरिक्तानिऊनमासिकादीनिकालेकृत्वा एकत्रैक्याद्दिवसैक्या
च्चतन्त्रेणापिभवन्तीतिसोऽपिप्रयोगोलिख्यते॥सिद्धान्नपक्षेपाकै
क्यमेव॥तत्रक्रमः॥श्राद्धदेशेश्राद्धीयवस्तून्यासाद्यदीपंप्रज्वाल्य॥
कर्त्तापूर्वाऽभिमुखउपविश्य॥कुशजलेन॥अपवित्रःपवित्रोवा॥
इत्यादिपठित्वा॥पुण्डरीकाक्षःपुनातु इतिउच्चार्यश्राद्धदेशंद्रव्या
ण्यात्मानंचसिंचेत्॥ततःकुशादिकमादाय॥अद्यामुकगोत्रस्याऽ
मुकप्रेतस्यप्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतुषोडशश्राद्धान्तर्गत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उनमासिक द्वितीयमासिक त्रैपक्षिक मासिक तृतीयमासिक चतुर्थमासिक
पंचममासिक षष्ठममासिक उनषाण्मासिक सप्तममासिक अष्टममासिक
नवममासिक दशममासिक एकादशमासिक द्वादशा ऽब्दिक श्राद्धानि त
न्त्रेणोद्दिष्टविधिना एकादशे एवाऽहं करिष्ये॥ इति संकल्पं कुर्यात्॥ अधि
कमासप्राप्ते षोडशपदस्थाने सप्तदशपदं भज्य॥ अधिकमासिकेति पदं प्र
क्षिप्य॥ वाक्यं कर्तव्यम्॥ नमो देवताभ्य इति त्रिः पठेत्॥ ततोऽपसव्येन कुशतिल
जलान्यादाय॥ अद्याऽमुकगोत्रस्याऽमुकप्रेतस्य उनमासिकश्राद्धे इदमासनं
ते मया दीयते तवोपतिष्ठतामिति कुशासनेषु सर्वपश्चिमभागे कुशासनमा
सनमुत्सृज्य॥ एवमेव तत्पूर्वपूर्वभागेषु कुशासनेषु क्रमेण तत्तत्पदप्रक्षेपे
ण वाक्यं कृत्वा कुशासनानि दद्युः॥ ततः अपहता असुरा रक्षांसि वे
दिषद इति वामावर्तेन तिलान् श्राद्धदेशे विकिरेत्॥ ततः क्रमेण पुटकादि
नि संस्थाप्य तेषु पवित्रेस्थ इत्यादिमन्त्रेण प्रत्येकं क्रमेण दक्षिणाग्राणि प
वित्राणि धृत्वा॥ जल तिल गन्ध पुष्पाणि स्वस्वमन्त्रेण प्रत्येकं क्रमेण क्षिपेत्॥
तत उनमासिकार्घपात्रं वामहस्ते कृत्वा॥ पुष्पसहितं पवित्रं नमो नारायणाये
ति मन्त्रेण अन्यपात्रोपरि उत्तराग्रं धृत्वा॥ या दिव्या इति मन्त्रेणार्घपात्रस्थज
लमभिमन्त्र्य॥ कुशादिकमादाय॥ अद्याऽमुकगोत्राऽमुकप्रेत उनमासिकश्रा
द्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलं दद
द्युत्सृज्य॥ एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण हस्तार्घमुत्सृजेत्॥ ततः प
वित्रादिसहितान्यर्घपात्राणि क्रमेण तत्र वामपार्श्वे प्रेतस्य स्थानमसीत्युत्ता
न्येव स्थापयित्वा॥ तदुपरि कुशान् दद्यात्॥ ततो गन्धादिना क्रमेण प्रत्येकं सं
पूज्य॥ कुशादीन्यादाय॥ अद्यामुकगोत्राऽमुकप्रेत ऊनमासिक द्वितीयमासि
क त्रैपक्षिक मासिक तृतीयमासिक चतुर्थमासिक पंचममासिक षष्ठममासि
क उनषाण्मासिक सप्तममासिक अष्टममासिक नवममासिक दशममासि
कैकादश द्वादशमासिकाब्दिक श्राद्धेषु एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्य
वासांसि ते मया दीयन्ते तवोपतिष्ठन्तामिति गन्धादिकमुत्सृजेत्॥ ततः क्रमेण
प्रत्येकमासनसहितान्नमंगपात्राणां चतुर्दिक्षु चतुरस्राणि मण्डलानि कृ

कृत्वा ॥ श्राद्धीयान्नऽग्रभागं घृततिलजलयुतं पुटकादौ कृत्वा एकैकेन इदमा
न्नमेतद्भूस्वामिपितृभ्यो नम इत्युत्सृजेत् ॥ ततः उरुषन् प्रिक्षमंतो पक
रणे अन्नं तिलजलं च क्रमेण प्रत्येकमुपनीय ॥ अन्नं मधुनाऽभिघार्य ॥
पात्रालम्भनाङ्गुष्ठावगाहनं विना पृथिवी ते पात्रं द्यौरपि धानं ब्राह्मण
स्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ इदं विष्णुरित्यादि सुरेत्यन्तं वम
अंपठित्वा ॥ अपहता असुरा रक्षांसि वेदिषदः ॥ इति तिलानन्नोपरि वि
कीर्य ॥ कुशादिकमादाय ॥ अद्याऽमुकगोत्रायाऽमुकप्रेताय ऊनमासि
कश्राद्धे इदमन्नं सोपस्करं ते मयादीयते तवोपतिष्ठताम् ॥ इति अन्नमुत्सृ
ज्य ॥ एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणाऽन्नान्युत्सृजेयुः ॥ सयेन
मधुवाता ऋच मधु मधु मधु इति च पठेत् अन्नहीनमिति मंत्रं ॥ नम
स्तुभ्यं विरूपाक्षेति श्लोकं च पठेत् ॥ अत्र विकरदाने रेखाकरणमुल्मुकभ्राम
णं च न भवति ॥ सव्यं कृत्वाऽचम्य ॥ अपसव्यं कृत्वा वेद्याः कार्याः पश्चिमतः
क्रमेणः प्रत्येकं पिण्डस्थानोपरि छिन्नमूलकुशान् दक्षिणाग्रानास्ती
र्य ॥ तिलजलगन्धयुतं पुटकादिकं वामहस्ते कृत्वा ॥ कुशादिकमादाय ॥
अद्यामुकगोत्राऽमुकप्रेत ऊनमासिकश्राद्धे इदमवनेजनं ते मयादीयते
तवोपतिष्ठतामिति अवनेजनं सर्वपश्चिमास्तृतकुशोपरि दद्यात् ॥ ए
वमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणाऽवनेजनानि दद्युः ॥ ततः तिलघृ
तमधुयुक्तेनान्नेन नारिकेलप्रमाणान्पिण्डान्कृत्वा ॥ कुशादिसहितं प्रथम
पिण्डमादाय ॥ अद्यामुकगोत्राऽमुकप्रेत ऊनमासिकश्राद्धे एष पिण्डस्ते
मयादीयते तवोपतिष्ठतामिति सर्वपश्चिमाऽवनेजनस्थाने पिण्डं दद्या
त् ॥ एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण द्वितीयादिपिण्डान्दद्यात्
॥ ततो दर्भमूलेन करं प्रोक्ष्य ॥ सव्यं कृत्वाऽचम्य हरिं स्मृत्वा ॥ अपसव्यं
कृत्वा प्रत्यादिकं पिण्डेषु निक्षिप्य भास्करमूर्तिं प्रेतं चिन्तयेत् ॥ कुशा
दिकं गृहीत्वा ॥ अद्याऽमुकगोत्राऽमुकप्रेत ऊनमासिकश्राद्धे पिण्डे
प्रत्यवनेजनं ते मयादीयते तवोपतिष्ठतामिति पिण्डे प्रत्यवनेजनं

दत्त्वा ॥ एवमेव क्रमेण प्रत्येकं द्वितीयादिपिण्डेषु तत्तन्त्यदप्रक्षेपेण प्रत्यवनेजनं द
द्यात् ॥ ततो नीविं विस्रंस्य ॥ सव्यं कृत्वाचम्य अपसव्यं कृत्वा ॥ वामेन पाणिना धृ
तं सूत्रं दक्षिणेनादाय ॥ उभाभ्यां हस्ताभ्यां प्रथमपिण्डोपरि प्रेतैतत्ते वास ॥ इति
सूत्रं दत्त्वा ॥ एवं द्वितीयादिपिण्डेष्वपि प्रत्येकं सूत्रं दद्यात् ॥ ततो गन्धादिना क्र
मेण पिण्डानभ्यर्च्य कुशादिकमादाय ॥ अद्याऽमुकगोत्राऽमुकप्रेत ऊनमासि
क द्वितीयमासिक त्रैपक्षिक तृतीयमासिक चतुर्थमासिक पंचममासिक ष
ष्ठमासिको नषाण्मासिक सप्तममासिकाऽष्टममासिक नवममासिक द
शममासिकैकादशमासिक द्वादशमासिकोनाब्दिक श्राद्धपिण्डेष्वेता
नि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यानि ते मयादीयन्ते तवोपतिष्ठन्ताम् ॥
इति उत्सृजेत् ॥ ततस्तत्पिण्डशेषान्नं तत्तत्पिण्डसमीपे विकीर्य्य ॥ शिवा आपः
सन्तु इति जलम् ॥ सौमनस्यमस्त्विति पुष्पम् ॥ अक्षतञ्चारिष्टमस्तु इति तण्डु
लान् ॥ क्रमेण प्रत्येकं अन्नपात्रोपरि क्षिपेत् ॥ कुशादिकमादाय ॥ अद्या
ऽमुकगोत्रस्याऽमुकप्रेतस्योनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठ
ताम् ॥ इत्यक्षय्योदकं दत्त्वा ॥ एवमेव क्रमेण अक्षय्योदकं दद्यात् ॥ सव्यं कृ
त्वा अघोरः प्रेतोऽस्तु ॥ इत्युच्चार्य दक्षिणां दिशं पश्यन् ॥ सर्वेषु पिण्डेषु पूर्वा
ग्रामेकां जलधारां दद्यात् ॥ अत्राशीः प्रार्थनं निषेधः ॥ अपसव्यं कृत्वा ॥ ततः
सर्वेषु पिण्डेषु क्रमेण सपवित्रान् कुशान् दत्त्वा ॥ पूर्वकादिस्थजलादिनाम
न्त्रपाठं विना ॥ इदमूर्जे ते मयादीयते तवोपतिष्ठताम् इति प्रथमपिण्डस्थ
सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ॥ एवमेव क्रमेण प्रत्येकं द्विती
यादिपिण्डस्थसपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ॥ ततः पिण्डाना
घ्रायोत्थापयेत् ॥ पिण्डाधारकुशान् वह्नौ क्षिपेत् ॥ अर्घपात्राणि संचाल्य ॥ सव्यं कृ
त्वा ॥ आचम्य दक्षिणाद्रव्यसहितं कुशादिकमादाय ॥ अद्याऽमुकगोत्रस्याऽमुकप्रे
तस्य कृतैतदूनमासिक द्वितीयमासिक त्रैपक्षिक तृतीयमासिक चतुर्थमासि
क पञ्चममासिक षष्ठमासिको नषाण्मासिक सप्तममासिकाऽष्टममासि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क नवममासिक दशममासिक एकादशमासिक द्वादशमासिक आनाब्दिक श्राद्धप्र
तिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्रेभ्यो यथानामशर्म्मभ्यो ब्राह्म
णेभ्यो यथाभागं विभज्य दक्षिणां दक्षिणां दातुमहमुत्सृजे ॥ इति दक्षिणां
दत्वा ॥ नमो देवताभ्य इत्यादित्रिः पठेत् ॥ ततोऽपसव्येन ॥ दीपमाच्छाद्य ॥
हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य ॥ श्राद्धग्रहणेनाकामः ॥ प्रमादादिति प
ठित्वा विष्णुस्मरणं कुर्यात् ॥ श्राद्धीयवस्तूनि ब्राह्मणेभ्यः प्रतिपादयेत् ॥
इति संक्षेपेणैकादशाह विधिः समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥

CC-0. In Public Domain. Digitized by eGangotri. Funding: MHRD

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५६८.५.५

॥ अथ दशदान विधिः ॥

[illegible]

Nepal Sanskri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रीगणेशाय नमः ॥ अथ दशदानस्यादौ प्रायश्चित्त गोदानम् ॥ प्राङ्मुख उपविश्य
आचमनं कृत्वा ॥ ॐ कर्मपात्रमहं करिष्ये ॥ ॐ कुरुष्व ॥ स्पष्टत्ततः सन्न यद्देवादेवहे
ऽनमिति कंडिकात्रयेण पवित्रं गंधादिकं च स्वस्वमंत्रैर्दत्वा कर्मपात्रं कर्तव्यम् ॥ तत्र
मंत्रः ॥ यद्देवादेवहेऽनं देवासश्चकृमा वयम् ॥ अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ
हसः ॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ॥ वायुर्म्मा तस्मादेनसो विश्वान्मु
ञ्चत्वꣳहसः ॥ २ ॥ यदि जाग्रद्यदि स्वप्न एनाꣳसि चकृमा वयम् ॥ सूर्यो मा तस्मादे
नसो विश्वान्मुञ्चत्वꣳहसः ॥ ३ ॥ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छि
द्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ ४ इति मंत्रेण पवित्रं क्षिपेत् ॥ ॐ शन्नो देवीर
भिष्टय आपो भवन्तु पीतये ॥ शंयोरभिस्रवन्तु नः ॥ ५ ॥ इति मंत्रेण जलम् ॥ तिलोसि
सोमदैवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वा
हा ॥ ६ ॥ इति तिलान् ॥ ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः ॥ इति मंत्रेण यवान् क्षि
पेत् ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्ण
न्निषाणामुम्म इषाण सर्वलोकम्म इषाण ॥ इति पुष्पाणि ॥ ८ ॥ ॐ गंधद्वारां दुरा
धर्षां नित्यपुष्टां करीषिणीम् ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इति गंधम् ॥
ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ॥ अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा
न्विन्द्र ते हरी ॥ इति अक्षतान् ॥ ततः कुशत्रयं गृहीत्वा कर्मपात्रोदकेन अनेन मंत्रेण
अभिषिञ्चेत् ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं
स बाह्याभ्यन्तरः शुचिः ॥ इति प्रतिज्ञा संकल्पः ॥ ॐ अद्येत्यादि ....
........श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामो गोदानादि दशदानकर्माहं करिष्ये
॥ गोपूजनमंत्रः ॥ ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥ नमो ब्रह्मसु
ताभ्यश्च पवित्राभ्यो नमो नमः ॥ ॐ इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या

स्या॥ ध्वरस्कन्मारोदसीविष्णवेतेदाधर्त्थपृथिवीमभितो मयूखैः स्वाहा॥ इति मंत्रद्वयेन
गां त्रिः संपूज्य॥ ॐ योऽस्मान्मात्रायी भूतद्रव्याय नमः ।॥ आ कृष्णेन रजसा वर्त्तमानो निवे
शयन्नमृतं मर्त्त्यं च॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ इति मंत्रे
ण देयब्राह्मणं त्रिः संपूज्य॥ कुशजलेन गामभ्युक्ष गोपुच्छं गृहीत्वा स्वशिरसि अनेनमं
त्रेण अभिषिञ्चेत्॥ ॐ मनो मे तर्प्पयत वाचं मे तर्प्पयत प्राणं मे तर्प्पयत चक्षुर्मे तर्प्प
यत श्रोत्रं मे तर्प्पयतात्मानं मे तर्प्पयत प्रजां मे तर्प्पयत पशून्मे तर्प्पयत गणान्मे तर्प्प
यत गणा मे मा वितृषन्॥ ततः कुशादिसहित गोपुच्छमादाय॥ ॐ तत्सत् ३ विष्णुः ३
अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य सकलजगत्सृष्टिका
रिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे यु
गे मलकादाधिपत्ये मनोः सप्तमे सत्ययुगेता द्वापरान्ते बौद्धावतारे कलियुगस्य प्रथमचर
णे भारतवर्षे भरतखंडे जम्बूद्वीपे आर्यावर्त्तान्तर्गत अमुकदेशे भागीरथ्याः अमुक
दिग्भागे अमुकक्षेत्रे अमुकक्षेत्रस्य अमुकदिग्भागे इष्टदेवप भूमौ प्रभवादिसम्वत्सर
णां मध्ये अमुकनामसम्वत्सरे श्रीसूर्ये उत्तरायणगते वा दक्षिणायनगते अमुक
ऋतौ मासोत्तमे मासि सौरेण वा चान्द्रेण अमुकमासि अमुकपक्षे अमुकवासरे अ
मुकतिथौ अमुकराशिस्थिते श्रीसूर्य्ये अमुकराशिस्थिते देवगुरौ अमुकराशिस्थि
ते चन्द्रमसि अन्येषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु अपरेषु एवं यथोक्तग्रह
गण विशेषेण विशिष्टायां यथानक्षत्रयोगकरण लग्न मुहूर्त्तान्वितायां शुभपुण्य
तिथौ .... यथानामशर्मा मया जन्मप्रभृति अद्य यावत् आ
चरितस्य समस्तपातकस्य अकृतप्रायश्चित्तस्य आमरणान्त पापापनोदकामः
इमां वस्त्रद्वययुतां स्वर्णशृंगीं रौप्यखुरीं रत्नपुच्छीं ताम्रपृष्ठीं घंटाचामरसंयु

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

तां काश्यपदोहनीं कपिलां धेनुं रुद्रदैवत्यां वियोगः प्रीत्यर्थं प्रायश्चित्तत्वेन अमुकगोत्रा
य अमुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे ॥ नम इति ॥ गोप्रार्थना ॥
प्रायश्चित्ते समुत्पन्ने निष्कृतिर्न कृता क्वचित् ॥ तस्य पापस्य शुध्यर्थं धेनुमेतां ददामि
ते ॥ गोदानप्रतिष्ठा ॥ तत्गोदानप्रतिष्ठार्थं द्रव्यम् कुशादिसहितमादाय ॥ अद्य
कृतैतत् श्रीपरमेश्वरप्रीतये कृतस्य यत्किंचित्सालंकारादियुतप्रायश्चित्तगोदानप्र
तिष्ठार्थं हिरण्यमग्निदैवतं रौप्यखंडं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदैवतमऽमुक
गोत्राय अमुक शर्मणे ब्राह्मणाय दान प्रतिष्ठात्वेन तुभ्यमहं संप्रददे ॥ ब्राह्मणः
स्वस्तीत्युक्त्वा ॥ ॐ कोदात्कस्मा ऽअदात्कामो दात्कामायादात् ॥ कामो दाता का
मः प्रतिग्रहीता कामैतत्ते ॥ इति पठेत् ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शा
न्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः
सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ इति मंत्रेण दातारं प्रतिग्रहीता ब्रा
ह्मणः अभिषेकं कुर्यात् ॥ गोभूयसिदक्षिणादानम् ॥ हिरण्यगर्भगर्भस्थं हे
मबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ देयद्रव्याय नमः
इति मंत्रेण दक्षिणाद्रव्यं संपूज्य ॥ कुशादिसहित दक्षिणामादाय ॥ ॐ तत्सत्
पूर्वसंकल्पसिद्धिरस्तु अद्य .... गोत्रस्य .... प्रवरस्य .... शर्
मणो मम अद्यकृतस्य प्रायश्चित्तगोदानकर्मणो न्यूनातिरिक्तपरिपूरणार्थं यथो
क्तफलप्राप्तये श्रीविष्णुदेवताप्रीतिपूर्वक वैकुण्ठ पुनर्मोत्तमलोक प्राप्तये इदं
भूयसी द्रव्यं सुवर्णं अग्निदैवतं रौप्यखंडं चन्द्रदैवतं ताम्रखंडं श्रीसूर्यदैवतं
.... गोत्राय .... शर्मणे ब्राह्मणाय भूयसी दक्षिणात्वेन दातुमहमु
त्सृजेत् ॥ ततः प्रतिग्रहीता ब्राह्मणेन इदं वैदिकमंत्रं पठेत् ॥ व्रतेन दीक्षामाप्नो
ति दीक्षयाप्नोति दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

व्रतप्रतिष्ठा अभावे व्रतप्रतिष्ठागोदानं कर्तव्यम्॥ पूजनमंत्राः प्रायश्चित्तगोदानेउक्त
म्॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्य अमुकगोत्रस्य ...... प्रवरस्य ......
शर्मणो मम श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं एकाद
श्यादि नानाव्रतकर्मणः प्रतिष्ठार्थं इमां गां यथाशक्ति सोपस्करां रुद्रदैवत्यां यथा
नामगोत्राय यथानामशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे॥ गोप्रा
र्थना मंत्रः॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी॥ तीर्थदेवमयी यस्मादतः
शान्तिं प्रयच्छ मे॥ यज्ञसाधनभूता या विश्वस्यान्नप्रदायिनी॥ विश्वरूपधरो देवः
प्रीयतामनया गवा॥२॥ गोदानप्रतिष्ठा॥ अद्य कृतेनैतत् व्रतप्रतिष्ठा दान प्रतिष्ठा
र्थं हिरण्यं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदैवतं ...... गो
त्राय ...... शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे॥ गोभूयसी
दक्षिणादानम्॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनन्तपुण्यफलद
मतः शान्तिं प्रयच्छ मे॥ देयद्रव्याय नमः इति मंत्रेण दक्षिणाद्रव्यं संपूज्य॥
कुशादिसहितदक्षिणामादाय॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्य अमु
कगोत्रस्य ...... प्रवरस्य ...... शर्मणो मम अद्य कृतस्य व्रतप्रतिष्ठा गोदान
कर्मणो न्यूनातिरिक्तपरिपूर्णार्थं यथोक्तफलप्राप्तये श्रीविष्णुदेवताप्रीतिपूर्वक
वैकुण्ठभुक्तिमोक्षमलोकप्राप्तये इदं भूयसीद्रव्यं सुवर्णं अग्निदैवतं रौप्यखण्डं चन्द्रदै
वतं ताम्रखण्डं श्रीसूर्यदैवतं ...... गोत्राय ...... शर्मणे ब्राह्मणाय भूयसीद
क्षिणात्वेन दातुमहमुत्सृजे॥ ......
ततो दशगोदानम्॥ दानविधिस्तु पूर्वप्रायश्चित्तगोदाने उक्तम् तत्र दशपनाम्॥ ॐ त
त्स पूर्वसंकल्पसिद्धिरस्तु अद्य ...... गोत्रस्य ...... प्रवरस्य ...... शर्मणो
मम सर्वपापक्षयार्थं इमां दशदानान्तर्गतां गां सोपस्करां सुवर्णादिदक्षिणायु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताम्रुद्रदेवत्यां ...... गोत्राय ...... शर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं
संप्रददे ॥ नम इति ॥ गोप्रार्थनामंत्रः ॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशि
नी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥१॥ गवामंगेषु तिष्ठन्ति भुवना
नि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥२॥ गोदानप्रतिष्ठा
॥ अद्यकृतैतत् श्रीपरमेश्वरप्रीतये कृतस्य यत्किंचित्सालंकारादि गोदान
प्रतिष्ठार्थं हिरण्यं अग्निदैवतं रौप्यखंडं चन्द्रदैवतं ताम्रखंडं श्रीसूर्यदै
वतं ...... गोत्राय ...... शर्मणे ...... ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यम
हं संप्रददे ॥ गोभूयसीदक्षिणादानम् ॥ हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः ॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ दिव्यद्रव्याय नमः ॥ इति मंत्रेण दक्षिणा
द्रव्यं संपूज्य ॥ कुशादिसहितमादाय ॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्य
...... गोत्रस्य ...... प्रवरस्य ...... शर्मणो मम अद्यकृतस्य गोदानकर्मणो न्यूनाति
रिक्तपरिपूर्णार्थं यथोक्तफलप्राप्तये श्रीविष्णुदेवताप्रीतिपूर्वक वैकुण्ठादि
उत्तमोत्तमलोकप्राप्तये इदं भूयसीद्रव्यं सुवर्णं अग्निदैवतं रौप्यखंडं चन्द्रदैवतं
ताम्रखंडं सूर्यदैवतं ...... गोत्राय ...... शर्मणे ब्राह्मणाय भूयसीदक्षिणा
त्वेन दातुमहमुत्सृजे ॥ अथ भूमिदानम् ॥ मानस्य निवर्तनमिता भूमिर्देया ॥ द
शहस्तेन दण्डेन त्रिंशद्दण्डा निवर्तनम् ॥ इति स्मरणात् ॥ कुशतिलयवजलान्यादा
य ॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येत्यादि ...... गोत्रस्य ...... प्रवरस्य ......
...... शर्मणो मम षष्टिवर्षसहस्रपरिमितस्वर्गे शिवपुरनिवासकामः सर्वपाप
क्षयकामः इमां दशदानान्तरगतां भूमिं बहुसस्यप्रदां विष्णुदैवत्यां ...... गोत्राय
...... शर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे ॥ नम इति ॥ भूमिप्रार्थ
नामंत्रः ॥ सर्वेषामाश्रया भूमिर्वराहेण समुद्धृता ॥ अनन्तसस्यफलदा अतः शां

तिं प्रयच्छ मे॥ यस्मा रोहंति वीजानि काले चैव महीतले॥ त्वत्प्रसादाच्च सकला
ममसन्तु मनोरथाः॥२॥ भूमिदानप्रतिष्ठा॥ अद्यकृतैतत् श्रीपरमेश्वरप्रीतये
भूमिदानप्रतिष्ठार्थं हिरण्यं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्री
सूर्यदैवतं ...... गोत्राय ...... शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं
संप्रददे॥ भूमिभूयसी दक्षिणादानम्॥ ॐ हिरण्यगर्भगर्भस्थं हेमवीजं वि
भावसोः॥ अनन्तपुण्यफलदमतः शांतिं प्रयच्छ मे॥ ॐ देयद्रव्याय नमः॥
इति मंत्रेण भूयसीं दक्षिणां संपूज्य॥ तिलयवकुशजलान्यादाय॥ ॐ तत्स
त् पूर्वसंकल्पसिद्धिरस्तु अद्येह ...... गोत्रस्य ...... प्रवरस्य ...... शर्मणो म
म अद्यकृतस्य भूमिदानकर्मणो न्यूनातिरिक्त परिपूर्णार्थं यथोक्तफलप्रा
प्तये श्रीविष्णुदेवताप्रीतिपूर्वक वैकुण्ठाद्युत्तमलोकप्राप्तये इदं भूयसीद्र
व्यं सुवर्णं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदैवतम् .. गो
त्राय ...... शर्मणे ब्राह्मणाय भूयसी दक्षिणात्वेन दातुमहमुत्सृजे॥ अथ
तिल[illegible]दानम्॥ तिलास्तु द्रोणत्रयमिता देयाः॥ पंचमण परिमिता भवन्ति॥
ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येह ...... गोत्रस्य ...... प्रवरस्य ...... श
र्मणो मम सर्वपापक्षयकाम दशदानान्तरगताः इमे तिला सोमदैवत्याः [illegible]
[illegible]दैवतं ...... गोत्राय ...... शर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे॥
न मम इति॥ तिलप्रार्थना॥ महर्षे गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदा
नेन मम पापं व्यपोहतु॥ तिलदानप्रतिष्ठा॥ जलतिलयवकुशादिन्यादाय॥ अद्य
कृतैतत् श्रीपरमेश्वरप्रीतये तिलदानप्रतिष्ठार्थं हिरण्यं अग्निदैवतं ...... गोत्राय
...... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ तिलभूयसी दक्षिणादानम्॥ हिरण्य
गर्भगर्भस्थं हेमवीजं विभावसोः॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

इति मंत्रेण भूयसी दक्षिणां संकल्प्य जलतिलयवकुशादिन्यादाय॥ ॐ तत्सत् पूर्वसं
कल्पसिद्धिरस्तु अद्येह ...... गोत्रस्य ...... प्रवरस्य ...... शर्मणो मम अद्य कृतस्य
तिलदानकर्मणो न्यूनातिरिक्त परिपूरणार्थं यथोक्त फलप्राप्तये श्रीविष्णुदेवताप्रीति
पूर्वक वैकुण्ठ धुनमलोकप्राप्तये इदं भूयसी द्रव्यं सुवर्णं अग्निदैवतं रौप्यखण्डंच
चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदेवतं ...... गोत्राय ...... शर्मणे ब्राह्मणाय भूयसी दक्षि
णात्वेन दातुमहमुत्सृजे॥ अथ हिरण्यदानम्॥ तच्च निष्कत्रयमितम्॥ कनिष्ठोक्त
दशमाषको निष्कः॥ ॐ हिरण्यायनमः॥ जलतिलयवकुशादिन्यादाय॥ ॐ तत्सत्
पूर्वसंकल्पसिद्धिरस्तु अद्येह ...... गोत्रस्य ...... प्रवरस्य ...... शर्मणो मम समस्त
पापक्षयकाम इदं हिरण्यं अग्निदैवतं ...... गोत्राय ...... शर्म
णे ब्राह्मणाय तुभ्यमहं संप्रददे॥ हिरण्यप्रार्थना॥ हिरण्यगर्भगर्भस्थं हेमबीजं वि
भावसोः॥ अनन्तपुण्य फलदमतः शान्तिं प्रयच्छ मे॥ हिरण्यदानप्रतिष्ठा॥ जल
तिलयवकुशादिसहितद्रव्यमादाय॥ अद्य कृतैतत् श्रीपरमेश्वरप्रीतये हिरण्यदा
नप्रतिष्ठार्थं हिरण्यं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदेवतम्
गोत्राय ...... शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे॥ हिरण्यभूय
सीदक्षिणादानम्॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनन्तपुण्य फलदःमत
शान्तिं प्रयच्छ मे॥ ॐ द्रव्याय नमः॥ इति मंत्रेण भूयसी दक्षिणां संकल्प्य॥ कुशादीन्यादा
य॥ ॐ तत्सत् पूर्वोक्त संकल्पसिद्धिरस्तु अद्येह ...... गोत्रस्य ...... प्रवरस्य ...... शर्म
णो मम सुवर्णदान कृत कर्मणो न्यूनातिरिक्त परिपूरणार्थं यथोक्त फलप्राप्तये श्री
विष्णुदेवता प्रीतिपूर्वक वैकुण्ठ धुनमोत्तमलोकप्राप्तये इदं सुवर्णं अग्निदैवतं रौ
प्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदेवतं ...... गोत्राय ...... शर्मणे ब्राह्मणाय भूय
सी दक्षिणात्वेन दातुमहमुत्सृजे॥ अथ आज्यदानम्॥ घृतं तु प्रस्थमितं दद्यात् विंशति

॥ अथस्वधादानविधिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Digitized In Public Domain. Digitization by eGangotri. Funding: MIDF

सेरकमितं भवति॥ जलतिलकुशादिन्यादाय॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येह
...गोत्रस्य ...प्रवरस्य ...शर्मणो मम समस्त पापक्षय काम इदं दशदानान्तर्ग
तं आज्यं मृत्युञ्जयदैवतं ...गोत्राय ...शर्मणे ब्राह्मणाय तुभ्यमहं संप्रद
दे॥ नम इति॥ आज्यप्रार्थना॥ कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितम्॥ देवाना
माज्यमाहार अतः शान्तिं प्रयच्छ मे॥ आज्यदानप्रतिष्ठा॥ कुशादिकमादाय॥
अद्यकृतैतत् श्रीपरमेश्वरप्रीतये आज्यदानप्रतिष्ठार्थं हिरण्यं अग्निदैवतं रौप्य
खण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदैवतं ...गोत्राय ...शर्मणे ...ब्राह्मणाय दान
प्रतिष्ठात्वेन तुभ्यमहं संप्रददे॥ आज्यभूयसीदक्षिणादानम्॥ हिरण्यगर्भगर्भस्थं
हेमबीजं विभावसोः॥ अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे॥ देयद्रव्याय नमः
इति भूयसीदक्षिणां संपूज्य॥ जलयवकुशादिन्यादाय॥ ॐ तत्सत् पूर्वसकल्पसि
द्धिरस्तु अद्येह ...गोत्रस्य ...प्रवरस्य ...शर्मणो मम अद्यकृतस्य आज्यदा
नकर्मणो न्यूनातिरिक्तपरिपूर्णार्थं यथोक्तफलप्राप्तये श्रीविष्णुदेवताप्री
तिपूर्वकं वैकुण्ठभुवनमोत्तमलोकप्राप्तये इदं भूयसीद्रव्यं हिरण्यं अग्निदैवतं
रौप्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्यदैवतं ...गोत्राय ...शर्मणे ब्राह्मणा
य भूयसीदक्षिणात्वेन तुभ्यमहं संप्रददे॥ अथ वस्त्रदानम्॥ सुक्ष्मवस्त्रद्वयं
बहुमूल्यं अहतं स्तमितं दद्यात्॥ ॐ वस्त्राय नमः॥ इति वस्त्रं संपूज्य॥ जलतिलयव
कुशादिन्यादाय॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येह ...गोत्रस्य ...प्रवर
स्य ...शर्मणो मम समस्त पापक्षय काम, इमे वाहस्पत्ये वाससी बृहस्पतिदै
वते ...गोत्राय ...शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ वस्त्रप्रार्थना॥ शीतवा
तोष्णसंत्राणं लज्जाया रक्षणं परम्॥ देहालंकरणं वस्त्र मतः शान्तिं प्रयच्छ
मे॥ वस्त्रदानप्रतिष्ठा॥ कुशादिन्यादाय॥ अद्य कृतैतत् वस्त्रदानप्रतिष्ठार्थं हि

...Campus, Ka...

रण्यं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्य्यदैवतं ....गोत्राय.... शर्मणे
ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे॥ वस्त्रभूयसीदानम्॥ ॐ हिरण्यगर्भ गर्भस्थं
हेमवीजं विभावसोः॥ अनन्तपुण्य फलदमतः शान्तिं प्रयच्छ मे॥ वस्त्रदानप्रतिष्ठा॥ जलति
लयवकुशान्दिव्यादाय॥ अद्यकृतैतत् वस्त्रदानप्रतिष्ठार्थं हिरण्यं अग्निदैवतं रौप्यखण्डं च
न्द्रदैवतं गोत्राय शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे॥ वस्त्रभूयसीद
क्षिणादानम्॥ हिरण्यगर्भ गर्भस्थं हेमवीजं विभावसोः॥ अनन्तपुण्य फलदमतः शान्तिंप्रय
च्छ मे॥ ॐ देवद्रव्याय नमः॥ इतिमंत्रेण भूयसीदक्षिणां संपूज्य॥ कुशान्दिव्यादाय॥ ॐ त
त्सत् पूर्वसंकल्प सिद्धिरस्तु अद्येह ....गोत्रस्य.... प्रवरस्य.... शर्मणो मम वस्त्रदानकर्मणो
न्यूनातिरिक्त परिपूरणार्थं यथोक्तफलप्राप्तये श्रीविष्णुदेवताप्रीतिपूर्वक वैकुण्ठपुरु
षोत्तमलोकप्राप्तये इदं हिरण्यं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ताम्रखण्डं श्रीसूर्य्यदैवतं
....गोत्राय.... शर्मणे ब्राह्मणाय भूयसिदक्षिणात्वेन दातुमहमुत्सृजे॥ अथ धान्यदान
म्॥ सार्द्धखारिद्वयव्रीहयो देयाः॥ तत्र सार्द्धशतद्वय परिमितं मणसङ्कं चेति॥ ॐ धा
न्याय नमः॥ जलतिलयवकुशान्दिव्यादाय॥ ॐ तत्सत् पूर्वोक्तसंकल्पसिद्धिरस्तु अद्ये
ह ....गोत्रस्य.... प्रवरस्य.... शर्मणो मम समस्त पापक्षय पूर्वकैहिकामुष्मिक
शिवफलावाप्तिकामः इदं दशदानान्तरगत ममुकसंख्य धान्यं प्रजापति दैवतम्....
गोत्राय.... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ न मम इति॥ धान्यप्रार्थना मंत्रः॥
सर्वदेवमयं धान्यं सर्वोत्पत्ति करं महत्॥ प्राणिनां जीवनोपाय मतः शान्तिं प्रयच्छ मे॥
धान्यदानप्रतिष्ठा॥ अद्यकृतैतत् धान्यदानप्रतिष्ठार्थं हिरण्यं अग्निदैवतं यथा
नाम्ने गोत्राय.... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ भूयसीदक्षिणां च दद्यात्॥
अथ गुडदानम्॥ गुडपलषष्टिमितं दद्यात्॥ गुडाय नमः॥ जलतिलयवकुशा
न्दिव्यादाय॥ ॐ तत्सत् पूर्वसंकल्प सिद्धिरस्तु अद्येह ....गोत्रस्य.... प्रवरस्य शर्म

Balmeeki Campus, Kathmandu

ममसमस्तपापक्षयपूर्वकं गृहे लक्ष्मीः स्थैर्यादिसिद्धिकामः इमं दशदानान्तर्गतं गु
डं रसवर्यं कुवेरदैवतं ...... गोत्राय ...... शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ नम इति ॥
गुडप्रार्थना ॥ गुडमिक्षुरसोद्भूतं मन्त्राणां प्रणवो यथा ॥ दानेनानेन मेनस्य पातु लक्ष्मीः स्थि
रा गृहे ॥ गुडदानप्रतिष्ठा ॥ तिलयवकुशद्रव्याण्यादाय ॥ अद्य कृतैतत् गुडदानप्रतिष्ठार्थं
सुवर्णं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं यथानामगोत्राय .... शर्मणे ब्राह्मणाय दानप्रति
ष्ठात्वेन तुभ्यमहं संप्रददे ॥ पूर्ववत् भूयसी दक्षिणा च कर्तव्यम् ॥ अथ रजतदानम् ॥ ॐ रज
तखेजाय नमः ॥ कुशादिकमादाय ॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येह ... गोत्रस्य ...
... प्रवरस्य ... शर्मणो मम समस्तपापक्षयपूर्वक शिवविष्णुपितृप्रीतिकाम इदं रजतं च
न्द्रदैवतं ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ नम इति ॥ रजतप्रार्थनामन्त्रः ॥
प्रीतिर्यतः पितृणां च विष्णुशंकरयोः सदा ॥ शिवनेत्रोद्भवं रूप्यमतः शान्तिं प्रयच्छ मे ॥ रजत
दानप्रतिष्ठा ॥ अद्य कृतैतत् रजतदानप्रतिष्ठार्थं श्रीपरमेश्वरप्रीतये हिरण्यं अग्निदैवतं ....
गोत्राय ... शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे ॥ भूयसीं दक्षिणा च क
र्तव्या ॥ अथ लवणदानम् ॥ लवणं सार्द्ध खारिकं दद्यात् ॥ ॐ लवणाय नमः ॥ ॐ तत्सत्
पूर्वसंकल्पसिद्धिरस्तु अद्येह ... गोत्रस्य ... प्रवरस्य ... शर्मणो मम समस्तपापक्षयपूर्वक
शिवप्रीतिकाम इदं दशदानान्तर्गतं लवणं सर्वरसोत्कृष्टं समुद्रदैवतं ... गोत्राय ......
शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ नम इति ॥ लवणप्रार्थना ॥ यस्माद्रसाः सर्वे नोत्
कृष्टा लवणं विना ॥ शंभोः प्रीतिकरं यस्माद् अतः शान्तिं प्रयच्छ मे ॥ लवणदानप्रतिष्ठा ॥
अद्य कृतैतत् लवणदानप्रतिष्ठार्थं हिरण्यं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ... गोत्रा
य शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ भूयसी दक्षिणा च कर्तव्या ॥ ....
अथ पंचधेनुदानानि ॥ ब्राह्मे नगादौ पापापनोद धेनुदानम् ॥ दानोपकरण गोदा
नोक्तास्त्व ॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येह ... गोत्रस्य ... प्रवरस्य ... श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्मणो मम मनोवाक्कायकर्मभिराजन्मोपार्जितपापापनोदकाम इमां कृष्णां पापापनोदधे
नुं यथाशक्ति सोपस्करं रुद्रदैवत्यां ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ नम
इति ॥ पापधेनुप्रार्थना ॥ आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः ॥ तत्सर्वं नाशमायातु
पापधेनुप्रदानतः ॥ पापधेनुदानप्रतिष्ठा ॥ अद्यकृतैतत् पापापनोदधेनुदानप्रतिष्ठार्थं सु
वर्णं अग्निदैवतं रौप्यरजतं चन्द्रदैवतं यथानाम गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं संप्र
ददे ॥ भूयसीं दक्षिणां च देया ॥ ऋणापनोदधेनुदानम् ॥ कुशादिमादाय ॥ ॐ तत्सत् पूर्व
संकल्पसिद्धिरस्तु अद्येह ... गोत्रस्य ... प्रवरस्य ... शर्मणः मम आजन्मोपार्जितैहिकामु
ष्मिकसमस्तऋणपातकच्छेदकाम इमां ऋणापनोधेनुं यथाशक्ति सोपस्करं रुद्रदे
वत्यां ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ नम इति ॥ ऋणधेनुप्रार्थना ॥
ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं ऋणम् ॥ तत्सर्वं नाशमायातु गामेकां ददतो मम ॥ ऋण
धेनुदानप्रतिष्ठा ॥ सुवर्णं दक्षिणां दद्यात् ॥ अद्यकृतैतत् ऋणापनोददानप्रतिष्ठार्थं हिर
ण्यं अग्निदैवतं यथानाम गोत्राय ... शर्मब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे ॥ भूय
सीं दक्षिणां देया ॥ मोक्षधेनुदानम् ॥ कुशादिकमादाय ॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु
अद्येह ... गोत्रस्य ... प्रवरस्य ... शर्मणो मम समस्तपापक्षयपूर्वकसंसारमोक्षावाप्ति
कामः श्रीपापापहमहाविष्णुप्रीतिकामश्च इमां मोक्षधेनुं यथाशक्ति सोपस्करं रुद्र
दैवत्यां ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ नम इति ॥ मोक्षधेनुप्रार्थ
ना ॥ मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन ॥ मोक्षधेनुप्रदानेन मम मोक्षोऽस्तु
वै गतः ॥ मोक्षधेनुदानप्रतिष्ठा ॥ अद्यकृतैतत् मोक्षधेनुदानकर्मणः दानप्रतिष्ठार्थं
हिरण्यं अग्निदैवतं ... गोत्राय ... शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे
भूयसीं दक्षिणां च देया ॥ आसन्नमरणं पित्रादिकं पुत्रादिस्तीर्थादौ नीत्वा दानं का
रयेत् ॥ अथ तिलपात्रदानम् ॥ यथाशक्तिकांस्यपात्रे तिलान् क्षिप्त्वा हिरण्यं च ॥ देयद्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्रव्यब्राह्मणेगोसंपूज्य॥कुशादिकमादाय॥ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येह ... गोत्र
स्य ... प्रवरस्य ... शर्मणो मम जन्मप्रभृति मरणान्तकृतनानाविधपापनाशनार्थं सहि
रण्यं तिलपात्रं विष्णुदैवतं ... गोत्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥
तिलपात्र प्रार्थना॥ तिलाः पुण्याः पवित्राश्च तिलाः सर्वकराः स्मृताः॥ शुक्लावाय
दिवा कृष्ण ऋषिगोत्रसमुद्भवाः॥ यानि कानिच पापानि ब्रह्महत्यासमानिच॥ ति
लपात्रप्रदानेन तानि नश्यन्तु सर्वदा॥२॥ महर्षेगोत्रसंभूताः कश्यपस्य तिलाः स्मृ
ताः॥ तस्मादेषां प्रदानेन मम पापं व्यपोहतु॥३॥ मंत्रमुच्चार्य विप्रहस्ते जलं क्षिपेत्
॥ तिलपात्र दानप्रतिष्ठा॥ अद्य कृतैतत् तिलपात्रदानप्रतिष्ठार्थं हिरण्यं अग्निदैवतं
... गोत्राय ... शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन दातुमहमुत्सृजे॥ नामगोत्राद्येति
पित्रा घशाक्तौ प्रत्यादि देयात्॥ तत्र मंत्रे ममेतिस्थाने अस्य पापं व्यपोहतु॥ इतिवदे
त्॥ अथ वैतरणीदानम्॥ आचम्य॥ ॐ अद्येत्यादि ... गोत्रस्य ... प्र
वरस्य ... शर्मणो मम यमद्वारावस्थितवैतरण्यास्व्यनद्युत्तरणार्थं गो
दानमहं करिष्ये॥ इति प्रतिज्ञासंकल्पं कृत्वा ब्राह्मणं गां गंधमाल्यादि
भिः संपूज्य॥ वैतरणी धेनुप्रार्थना॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महा
पथे॥ उत्तितीर्षुरहं देवि वैतरण्यै नमोऽस्तुते॥ ब्राह्मणप्रार्थना॥ विष्णु
रूप द्विजश्रेष्ठ भूदेव द्विजपावन॥ तर्तुं वैतरणीमेतां कृष्णां गां प्रददाम्यहं
म्॥ जलतिलयवकुशादीन्यादाय॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्ये
ह ... गोत्रस्य ... प्रवरस्य ... शर्मणो मम शतयोजनविस्तीर्णामगा
ध पूयशोणितवाहिनीं मांसशोणितकर्दमां केशशैवालयुतां वैतरणीं
नदीं संतर्तुं इमां कृष्णां गां वस्त्ररक्तमाल्याद्यलंकृतां रुद्रदैवताकां ... गो
त्राय ... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥ वैतरणी प्रार्थनामंत्रः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यमद्वारे महाघोरे घोरा वैतरणी नदी ॥ तां तर्तुकामो यच्छामि कृष्णां वैतरणीं
तु गाम् ॥ इत्युक्त्वा विप्रहस्ते जलं दद्यात् ॥ वैतरणी दानप्रतिष्ठा ॥ अद्य कृतै
तत् वैतरणी गोदानप्रतिष्ठार्थं सुवर्णं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं
·· गोत्राय ··· शर्मणे ब्राह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे ॥ ॥
अथोत्क्रान्ति धेनुदानम् ॥ गोब्राह्मणौ गन्धादिभिरभ्यर्च्य ॥ कुशतिलजला
न्यादाय ॥ ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अद्येह ···· गोत्रस्य ····· प्रवर
स्य ····· शर्मणो मम सुखेन प्राणोत्क्रमणार्थं यथाशक्त्यलंकृतां इमां उत्क्रान्तिधे
नुं रुद्रदैवतं ···· गोत्राय ··· शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ उत्क्रा
न्तिधेनु प्रार्थना ॥ मृत्युत्क्रान्तौ प्रवृत्तस्य दुःखोत्क्रान्ति निवृत्तये ॥ तुभ्यं संप्र
ददे नाम्ना गां समुत्क्रान्ति संज्ञिकाम् ॥ इत्युक्त्वा विप्रहस्ते जलं दत्त्वा ॥ दान
प्रतिष्ठां कुर्यात् ॥ उत्क्रान्तिदानप्रतिष्ठा ॥ अद्य कृतैतत् उत्क्रान्ति धेनुदानप्र
तिष्ठार्थं सुवर्णं अग्निदैवतं रौप्यखण्डं चन्द्रदैवतं ···· गोत्राय ···· शर्मणे ब्रा
ह्मणाय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे ॥ इति दशदान विधिः शुभम्

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ki Campus, Kathmandu